। यदा तु कृद्भिः सह तदा प्राक्सुबुत्पत्ते रित्यर्थश्चाश्रीयते । तथा च गतेरायंते न समासेऽव्ययपूर्वपदप्रकृतिस्वरे शेषनि
घाते उदात्तवत्वं नास्तीत्ययं निघातो न भवत्येव यदा तु गतिकारकोपपदादित्यत्र कृच्छब्दस्य प्रत्याख्यानं तदाआमन्त
स्योदात्तवेशेषनिघाते न गतेर्निघाते सिद्धे तस्मिन्प्राप्ते तस्य न प्रयोजनं । अथ यत्तरवंते न समासं हत्वा आम् क्रियते तदा पत्त्रद्वये
थाप्रत्ययेरणौ वृभात्वमिति तस्य प्रयोजनं । अन्ये तु गतिकारकोपपदानां कृद्भिरेव समासः सच सुबुत्पत्तेः प्रागित्याश्रीयते । त
था च गतेरामंते न समासाभावादुदात्तवत्याम् ते परे गतेर्निघात इत्यमुत्राप्तिङ्ग्रहणे न सिध्यतीति तदर्थं यत्नः कर्त
व्य इति काशिका तत्राय यत्नः । तिङ्ग्रहणेन क्रियाप्रधानं पदं लक्ष्यत इति ङः तस्य क्रियाप्रधानपदत्वात्तेनायमर्थः
क्रियाप्रधाने पदे उदात्तवति परे गतिर्निहन्यते इति । तेन यत्प्रपचति । यत्प्रकरोति । प्रपचतितरां इत्यादौ सर्वत्र सिध्यति रा०प्र०
आघं मतं गतिकारकोपपदादिति सत्रे भाष्यात्प्रतीयते । द्वितीयं तु अस्मिन्नेव सत्रे भाष्यात् प्रतीयत इत्युभयमप्यनुसी ३४
मिति ङः तस्य राशीगोत्रादीस्विपि प्रमाणं । उदात्तवति किं । प्रपचति । तिङोगोत्रादीति कुत्सनाभीक्ष्णयोः श्री

पं योगो विभज्यते तिङो गोत्रादीनि । तिङ्‌स्ताद्धराणि गोत्रादीन्यनुदात्तानि स्युः । ततः कुत्सनाभीक्ष्ण्ययोः गोत्रादीनीत्यनु
वर्तते । कुत्सनाभीक्ष्ण्ययोश्च गोत्रादीनि तिङ्‌पदानीति पञ्चम्या बध्यते पचति गोत्रं स्वकुलं पीडयतीत्यर्थः । एवं हि कुत्सा भवति । अद
नस्तु पचिर्व्यक्तीभावे । यथा लोकानोपचक्तिः भोजनार्थं गोत्रं स्वमुपयतीत्यर्थः एवं हि कुत्सा भवतीति ननु व्यक्तीभावार्थस्य
पचेरात्मनेपदित्वादिदित्वात्‌ । पचति पचति गोत्रं अनेनकार्थत्वात्पचिः करोत्यर्थो विवाहगादात्रं पुनः सुखी करोतीत्यर्थः
ध्रुवा । केन बन्धभावश्च निपात्यते । कुत्सितवचनो यं । प्रवचनप्रयजन प्रहसन प्रकथन । प्रत्ययन विचक्षणा । प्रवक्षणा ।
स्वाध्यायी अवरक्षणा । भयिष्टा । वा नामेति पठ्यते । पचति नाम । पक्षे तिङि हि ते । पक्षे न पुनः कत्वादाद्युदात्तं । तिङः किं । कुत्सि
तं गोत्रं गोत्रादीनि किं । कौरीति पायं । कुत्सनाभीक्ष्ण्ययोः किं खनति गोत्रं समेत्य कूपं । कुलं मिलित्वा कूपं खनतीत्यर्थः । यो
गविभागे न परिभाषाकरणात्तु चेन चिदिवेति सत्रे पि गोत्रादीन्येतद्दिभयारोपवेशलभ्यते । एजेनान्यजितमनुदात्तं ।
अत्र काष्ठादिभ्य इति वाच्यं । एजेनेभ्यः काष्ठादिभ्यः परं एजितं पदमनुदात्तं स्यात्‌ । उत्तरसूत्रे तिङ्‌ग्रहणादिदेसुवेनवि
षयं । काष्ठाध्यातयपोपाः एजेन वचनाभवेति । काभाध्यायकः । दारुणाभिरूपकः । समासविषयकं सूत्रमिदं । काष्ठा
दारुणादीनि प्रकृतिभिस्त्तोनामयथ्ययनाभिरूप्यादीनां विशेषणानीत्य सामानाधिकरण्यान्न समासोप्राप्तो
मयूरव्यंसकादित्वात्समासः । मलोपश्च वाच्यः दारुणं अभिरूपः इति समासे कृते विभक्तेर्लुकि स्वाभाविकी मकार

३५ त्तिरितिरेनेन वचनेनान्वाख्यायत इति वृत्तिन्यासकारयोर्मतं। भाष्यवार्त्तिककैयटास्तूक्तादेव सामानाधिकरण्या
त्समासाभावेऽम समीसे एवास्य सूत्रस्य प्रवृत्तिमिच्छन्ति। मयूरव्यंसकादित्वे नास्ति प्रमाणं। हरदत्तोप्याह। यदिस
मासएवेदमभिमतमभविष्यत्तदा समास इत्येवावक्ष्यति हिति। [illegible]। न तत्र समासाधिकरणोऽस्ति येन स
मासस्यात्। अस्मिन्नर्थेऽम्लोपवचनं च सार्थकं। ननु स्मिन्नर्थे दारुणामभिरूप इत्यादिप्रयोगासिद्धिः। भाष्यान्ना
याति चेन्नाभ। किंकर्तव्यमममत्वया। भाष्यविरोधाद्दोषात्तत्रैव स्यात्तु वामनः। एजनात्किं। दाप्रयोगासिद्धिः। भाष्य
न्नायाति चेन्नाभ। किंकर्तव्यमममत्वया। भाष्यविरोधाद्दोषात्तत्रैव स्यात्तु वामनः। एजनात्किं। दारुणोऽध्यायकः
दारुणाध्यायक इत्यर्थः। एजित ग्रहणस्य पदत्वान्नित्यमिति सूत्रे प्रयोजनमुक्तं कोशादिभ्यः किं। शोभनोऽध्या
पकः। सर्वस्य द्वे तस्य परमाम्रेडितं। अनुदात्तं चेत्यनुवर्त्तमाने। नित्यवीप्सयोः। आभीक्ष्ण्ये वीप्सायां च सर्वस्य पदस्य
स्य द्विरुक्तिः स्यात्तस्य परमाम्रेडितसंज्ञं स्यादनुदात्तं च स्यात्। एवमुत्तरसूत्रेष्वपि वाक्यार्थो ज्ञेयः। आभीक्ष्ण्यं पौ
नःपुन्यं। तिङ्कृत्सु कृदव्ययेषु। एवं भवति नान्यत्र। जल्पति जल्पति। भुक्त्वा भुक्त्वा व्रजति। व्याप्तमिच्छा वीप्सा। दे
वृदेवं वो वसेद्वेदे वृक्षमभिषिञ्चये। एकस्य पदस्य पदद्वयमादेशो न तु द्विः प्रयोगमात्रमिति सिद्धान्तः। इदं पदस्यैव द्वि रा॰ल॰
त्वं न तु वाक्यस्य। हगतिकस्य द्वित्वं वाच्यं। प्रपचति प्रपचति। इदं द्वित्वं वाक्यस्यापि द्वित्वपरस्यानुदात्तत्वं चेष्यते। ३५

मत्स्यं असहिष्यतिरश्चापले द्वित्वं वाच्यं। आम्रप्रतियादनं चापलं। अहिरहिर्बुध्यस्व। न केवलं द्वित्वमेव। यावद्भिः शब्दैः सोऽर्थो
गम्यते तावंतः शब्दाः प्रयोक्तव्याः। अहिः २ बुध्यस्व ४ तथा पुनरुक्तेदं शाब्दीयं द्वित्वं किंतु परप्रत्यायनाय अनेकपदप्रयोग इति
आमेडितानुदात्तत्वं न भवतीत्याहुः। क्रियासमभिहारे द्वित्वं वाच्यं। क्रियासमभिहारः पौनःपुन्यं भृशार्थश्च। तत्र भृशार्थे
भिदं पौनःपुन्यमपि यत्र लोटा क्रियासमभिहारे च द्योतिते तत्र दर्थचः यङ्द्योतिते त्वाभीक्ष्ण्ये न भवतीति तेनैव तस्यार्थस्य द्यो
तितत्वात्। लोडादयस्तु अर्थद्योतनाय द्वित्वमपेक्षंते। स भवान् लुनीहि लुनीहीत्येवायं लुनाति। भुक्त्वा भुक्त्वा भोजं भोजं।
परेर्वर्जने। अत्र असमासे वेति च वाच्यं। परेर्द्वित्वं वा स्याद्वर्जने। परि परि त्रिगर्तेभ्यो वृष्टो देवः। परि त्रिगर्तेभ्यो वृष्टो देव
त्रिगर्तान्परिहायेत्यर्थः। अपपरी वर्जने इति कर्मप्रवचनीयत्वात्तद्योगे पंचमी। समासे तु। परित्रिगर्तं वृष्टो देवः
अपपरिबहिरंचवः पंचम्या इत्यव्ययीभावः। प्रसमुपोदः पादपूरणे। पादपूरणार्थमेषां द्वित्वं स्यात्। प्रप्रवस्त्रिष्टुभमिषं। संस
मिद्युवसे वृषन्। उपोप मे परामृश। किं नोदुदु हर्षसे दातवा उ। पादपूरणात्किं। प्र देवं देव्या धिया। उदु त्यं जातवेदसं।
छंदस्येवैतद्द्वित्वं सामर्थ्याद्भाषायामनर्थकस्य प्रयोगाभावात्। उपर्यध्यधसः सामीप्ये। कालकृता देशकृता च प्र
त्यासत्तिः सामीप्यं। तस्मिन्विवक्षिते उपर्यध्यधसां द्वित्वं स्यात्। उपर्युपरि ग्रामं। अध्यधि ग्रामं। अधोधो ग्रामं। ग्रामस्य
सामीप्येनोपरिष्टादधस्ताद्वेत्यर्थः। कालकृता। उपर्युपरि दुःखं। अध्यधि। अधोधो दुःखं। सामीप्ये किं। उपरि शिरः। उ

३६ परिशिरस्को घटान्तधारयंतीत्यत्र सदपि सामीप्यं न विवक्षितमौन्नत्यधर्ममात्रमेव विवक्षितमिति हि त्वाभावः वाक्यादे
रामंत्रितस्य सूया संमतिकोपकुत्सनभर्त्सनेषु। असूयादिषु यद्वाक्यं तस्यादेरामंत्रितस्य द्वित्वं स्यात्। परगुणानामसह
नमसूया। माणवक २ माणवक अभिरूपक २ अभिरूपक व्यर्थं ते आभिरूप्यं। पूजनं संमतिः। माणवक २ इत्यादिं
शोभनोसि। कोपः क्रोधः। माणवक माणवक अविनीतक २ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सनं निंदनं। श
क्तिके २ शक्तिके २ रिक्तास्ते शक्तिः। शक्तिः प्रहरणं हस्त्यादि वर्तमानाकुत्सिते कः। अपकारं शब्दयोत्पादनं भर्त्सनं। चोर
चोर २ वृषल वृषल दस्यो २ दस्यो घातयिष्यामि त्वां बंधयिष्यामि त्वां अत्र असूयादिषु प्लुतमप्रेडितं इति पक्षे स
प्लुतः भर्त्सने त्वाम्रेडितं भर्त्सने इति पर्वीन्तरयोः पर्यायेणा वा वृत्त्यादेः किं शोभनोसि माणवक। आमंत्रितस्य किं। उ
दारो देवदत्तः असूयादिषु किं। देवदत्त गामभ्याज। एकं बहुव्रीहिवत् द्विरुक्तः एकशब्दो बहुव्रीहिवत्स्यात् द्वित्वं तु
सिस्य वीप्सयोरनेन। सुकुप्पुवद्भावोप्रयोजनं। यद्यपितो बहुव्रीहावितिनोच्येत तथापित्र तत्र द्रष्टावेति दिश्येत। ए
केकमक्षरं पठति। एकैकया। अत्रा वयदे विशेषः एकैकस्मै अत्र सर्वनामसंज्ञा निषेधो नास्ति। बहुव्रीहिवद्भावा बहु
व्रीहिस्तत्र निषेध इति व्याख्यानात। आबाधे चापीडायां पदस्य द्वित्वं स्याद्बहुव्रीहिवच्च स्यात्। गतगतः नष्टनष्ट राम० ३६
ःगतगता। नष्टनष्टा। प्रियस्य विरहेण गमनादेनापी डमानः कश्चिदेवं प्रयुंक्ते ननः। सुपु। अत्र नस्सुभ्यामित्यंतो

दात्तत्वं न भवति। तत्र वर्न्ने समासे इत्यतः समासग्रहणात् प्रकर्षेण समासो यो बहुव्रीहिरिति व्याख्यानात्। कर्कूऋकृ
रः पः त्रेकपूर ध्वूरिति समासांतो न। तत्र समासाच्चते द्विपयादित्यतः समासग्रहणानुवृत्तेरित्याहुः। परं तु अनि हूरं अ
नेकविधिभिर्व्यवच्छिन्नं कथमनुवर्त्तेतेति विचारणीयं। ननेत्यत्र नलोपो न भवति। नलोपो न भवत्यत्र नञः सामर्थ्यादि
ष्टेन कार्यित्वेन निमित्तभावस्याबाधात्। कार्यातिदेशो यं तेनाम्रेडितानुदात्तत्वं बाधित्वा परत्वादनेन बहुव्रीहिपूर्व
पदप्रकृतिस्वरो भवति। एवं सति ननु सुसुहृत्यत्र सामर्थ्यादिष्टेन निमित्तभावे च कार्यित्वबाधान्न तत्र सुभ्यामित्य
स्यानिवारणाय समासापकर्षणात्क्लेशः कैयटादीनामयमर्थः एवं। कर्मधारयवदुत्तरेषु। उत्तरेषु द्वित्वेषु कर्मधा
रयवत्कार्यं स्यात्। सुब्लुक्पुंवद्भावसमासांतोदात्तत्वानि प्रयोजनानि। पटुपटुः। मृदुमृदुः। पुंवद्भावः। पटुप
ट्वी। मृदुमृद्वी। कालिकालिका। कोपधाया अपि कर्मधारयात् पुंवद्भावात् पुनः पुंवत्कर्मधारयेति पुंवद्भावो भवति। कार्या
तिदेशोयं। तेनाम्रेडितानुदात्तत्वं बाधित्वा परत्वात्समासांतोदात्तत्वं भवति। प्रकारे गुणवचनस्य। सादृश्ये द्योत्य
गुणवचनस्य द्वे स्तः। पटुपटुः। पटुपट्वी। पटुसदृशः। ईषत्पटुरित्यर्थः। गुणोपसर्जनद्रव्यवाचिनः केवलगुणवा
चिनश्च ग्रहणं। तेन शुक्लशुक्लं रूपं। शुक्लशुक्लो गुणः। शुक्लशुक्लः पटः। प्रकारे किं। पटुर्देवदत्तः। गुणवचनस्य किं
। अग्निर्माणवकः। आनुपूर्व्ये द्वे वाच्ये। मूले मूले स्थूलाः। अग्रे अग्रे सूक्ष्माः। स्वार्थेऽवधार्यमाणोऽनेकस्मिन्द्वे वाच्ये

२७ ।अस्मात्कार्षापणाद्इह भवद्भ्यां माषं देहि।सोऽर्थ एवैतद् इति त्वं॰ अत्र हि ह्रस्वे वमाषो दीयते न सर्वे कार्षापणात् हे वधिनो माषा इति वी
प्सायोगो नास्ति। अवधार्य माह्णो किं।अस्मात्कार्षापणात् ह्येकं माषं देहि वार्त्ति के कर्मधारयवद्भावो न सर्वथ(?) ते। तेन सुवृत्तु
कूसमासांतोदात्तत्वं च न भवति।डाचि कर्तव्ये वहुलं द्वित्वं वाच्यं।परपरा करोति।अत्र डाचि पिर्लुत्वोदंतोदात्तत्वं॰ वहुलवच
नादव्यक्तानुकरणाद् अन्यत्र डाचि न द्वित्वं।द्वितीया करोति।पर्व प्रथमतरं।स्त्रीलिंगाभिधेयायां विभक्तौ वर्त्तमानयोर्डतरडतमा तयो
समसंप्रधारणो विषये द्वित्वं वाच्यं। एतावां यो कतरः कतर एतयोरायता। इमे आघाः कतमा कतमा एवामायता।अन्यत्रापि दृश्य
ते। कीदृशी कीदृशी अनयो रघता।एवं एतौ आयौ कतरः कतरः अनयोर्विभवः कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च
वहुलं।वहुलग्रहणाद् अपरयोर्नैः समासवत् इतरश्च दस्य तु नित्यं।असमासवद्भावे पर्वपदस्थस्य सुपः सुर्वाच्यः।अन्योन्यं
विप्रा नमंति।अन्योन्यो अन्योन्येन अन्योन्यस्मै।एवं परस्परं।कस्कादित्वात् सः।अत्रामेडितानुदात्तत्वमेव इतरेतरं।इ
तरेण।अत्र समासांतोदात्तत्वं।स्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेराम् भावो वा वाच्यः।अन्योन्यां विप्रा नमंति।अ
न्योन्यौ अन्योन्येन अन्योन्यस्मै।एवं परस्परं।कस्कादित्वात् सः।अत्रामेडितानुदात्तत्वमेव इतरेतरं।इतरेतरेण।अत्र स
मासांतोदात्तत्वं।स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम् भावो वा वाच्यः।अन्योन्यां।अन्योन्ये।परस्परां परस्परं।इत श॰ग॰
रेतरां इतरेतरं वा इमे ब्राह्मण्यौ कुले भोजयतः।अरु छे प्रिय सुखयोरन्यतरस्यां।अरु छे प्रियसुखयोर्द्वित्वं वा समासवच्च २७

धारयवच्चास्मात्। प्रियेण ददाति। प्रियेणा ददाति। सुखसुखेन ददाति। सुखेन ददाति। अनायासेन ददातीत्यर्थः। कर्मधारयव
द्भावात् सुब्लुक् समासान्तोदात्तत्वं च। अकृच्छ्रे किं। प्रियः पुत्रः। प्रियो रथः। यथास्वे यथायथं। यथास्वमिति वीप्सायाम् अव्ययीभा
वः। स्वशब्द आत्मवचनः। आत्मीयवचनश्च। यो य आत्मा यच्च यदात्मीयं तद् यथास्वं। तस्मिन् यथायथमिति यथाशब्दस्य द्वित्वं नपुं
सकत्वं च निपात्यते। कर्मधारयवद्भावादन्तोदात्तत्वं भवति। सर्वे पदार्था यथायथं जाताः। यथास्वभावमित्यर्थः। सर्वे वै तु
यथायथं। यथात्मीयमित्यर्थः। द्वंद्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु। रहस्यादिषु द्वि
शब्दस्य द्वित्वं कर्मधारयवद्भावात् सुब्लुकि पूर्वपदस्यान्तस्य अमभावः। उत्तरपदस्यादन्तत्वं च निपात्यते नपुंसकत्वं च
द्वंद्वं मन्त्रयते। द्वौ द्वौ भूत्वा रहस्यं मन्त्रयते इत्यर्थः। मर्यादा स्थित्यनतिक्रमः। आचतुर्थाद्धि मे पशवो द्वंद्वं मैथुनाय
ते। माता पुत्रेण पौत्रेण प्रपौत्रेण तत्पुत्रेण च मैथुने गच्छतीति भवति मर्यादा। एतावदेव हि पशूनामायुः। व्युत्क्र
मणे पृथगवस्थाने। द्वंद्वं व्युत्क्रान्ताः। द्वौ पक्षौ भूत्वा पृथगवस्थिता इत्यर्थः। इह स्वार्थे द्वित्वमेकवद्भावश्च निपात्यते।
यज्ञपात्रप्रयोगे। द्वंद्वं न्यञ्चि पात्राणि प्रयुनक्ति। अभिव्यक्तौ। द्वंद्वं नारदपर्वतौ। द्वौ साहचर्येणाभिव्यक्तौ इत्यर्थः। चा
र्थे द्वंद्व इति प्रयोगादन्यत्रापि भवति। द्वंद्वं युद्धं वर्तते। द्वयोर्युद्धमित्यर्थः। द्वंद्वानि सहते। इति सुबन्तस्य स्वराः। अथ समा
सस्वराः। समासस्य। समासस्यान्त उदात्तः स्यात्। राजपुरुषः। ब्राह्मणकम्बलः। कन्यास्वनः। पटहशब्दः। नदीघोषः। स्व

रविधौ बैज न स्याविद्यमानत्वात् ॥ लं ते श्वपिराजदेवताब्राह्मणास्समिताः पर्यायेण नानापदानां स्वरे प्राप्ते अयमारंभः । कनिष्ठु
हृषीत्यादिना कनिनंतो राजन् । पुरः कुषन् पुरुषः । ब्रह्मण्यायत्तं ब्राह्मणाः । कर्मे वुंक्ष्वेति कलः । केवलः । कन्या राजन्यमनु
ष्याणां मंतद्वितिस्वरितं नाक न्यास्व न हृसो वैत्यपा स्वनः पूर्वस्यटत् दन्यंतेयरहः एषादशादिरंतोदात्तः । शार्ङ्गयिष्यां दृढनो
। शब्दः पचादिसुनरदूधाघोषघञंतः ॥ हरणातिः पुकुहूस्वश्चेत्यदिः प्रत्ययः । दषात्समिध्यतेनयेति समित् संपदादित्वात् क्वि
प् । कृदुत्तरप्रकृतिस्वरः । द्वेन सह समासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वे च वाच्यं । समासांतोदात्तत्वापवादः । जी
मूतस्येवभवति । जीमूतशब्दो मध्योदात्तः । तथा हि । जेर्मूट् दादेतः । जेः न् स्यात् स्यादात्तो मूडागमो जेर्दीर्घश्च । लघा
वंते द्वितीयामध्योदात्तः । बहुब्रीहौ प्रकृत्या पूर्वपदं । डदात्तस्वरितयोगि पूर्वपदं बहुब्रीहौ प्रकृतिस्वरे स्यात् । प्रियविश्वः । विश्व
प्रियः । इगुपधज्ञेति कांतोतोदात्तः । प्रियः । अश्व पुष्विति कन्नंत आद्युदात्तो विश्वः । कार्ष्णाइत्तरासंगो यस्य स कार्ष्णोत्त
रासंगः । कृष्णाम्टगः । तस्य विकारः प्राणिरजतादिभ्योञ् आद्युदात्तः कार्ष्णः । कूपवलजः । निरुदीर्घश्चेति कर्मणि कृत्
भ्यां चेति प्रत्ययांतः कूपश्चाद्युदात्तः स्नातकपुत्रः । यावादिकनंतः स्नातकः । मनुष्यनाथः मनोर्जातावितिति स्वरितः । बहु
ब्रीहाविति किं । राजपुरुषः कन्यापुरुषः । पूर्वसूत्रे तु समपादद्वयस्य समासमसांतोदात्तत्वमेव । अव्ययं स्फोटायनस्पत्राद्यु
दात्तनिपातनमुपदेशिवद्वचनात्तत्पुरुषे तोदात्तत्वा बहुब्रीहौ विश्वं संज्ञायां । बहुब्रीहौ किं । कर्मधारये तोदात्तः । विश्वदेवः

असंज्ञायां तु विश्वदेवः। विश्वमित्रः विश्वाजिनः। अत्र संज्ञायां मित्राजिनयोरिति भवति परत्वात्। ऋषौ विश्वामित्रेऽयमेव स्व
रो भवति। ऋषिप्रतिषेधो मित्रे इति तत्र वचनात्। उदराश्वेषुषु। एषूत्तरपदेषु बहुव्रीहौ संज्ञायां पूर्वपदमन्तोदात्तं स्यात्। वृकोदरः।
दामोदरः। हर्यश्वो युवनाश्वः। सुवर्णो नेजसुभ्यामित्यन्तोदात्तः। सुवर्णपुंखइत्यत्र पूर्वपदप्रकृतिस्वरेणासएव स्वरः। सु
वर्णपुंखेषुः। अत्र पूर्वपदमन्तोदात्तः। हृपिषिरुहीति इन्नन्तो हरिशब्द आद्युदात्तः यणि कृते उदात्तस्वरितयोर्यण इति स्वरितः। क्षेपे।
बहुव्रीहौ उदराश्वेषु उत्तरपदेषु पूर्वपदमन्तोदात्तं स्यान्निन्दायां। कुंडोदरः। तद्विषयस्येत्याद्युदात्तः कुंडं। कटुशब्दात्संज्ञा
यां कन्। कटुकाश्वः। अनिघातेषुः। निहन्यते येन स निघातः ततोन्योऽनिघातः। पूर्वपदप्रकृतिस्वरेणाद्युदात्तः। अक्षेपे तु
पूर्वपदप्रकृतिस्वर एव भवति सर्वत्र। अनुदरः। सूदरः इत्यत्र परत्वान्नञ्सुभ्यामिति स्वरः। नदी बंधुनि। बहुव्रीहौ बंधुश
ब्द उत्तरपदे नद्यन्तं पूर्वपदमन्तोदात्तं स्यात्। गार्गीबंधुः। वात्सीबंधुः। गार्ग्यादि यञन्ताभ्यां यञश्चेति ङीपि आद्युदात्तावेतौ। नदी किं। ब्र
ह्मबंधुः। ब्रह्मेति मनिन्नन्तत्वादाद्युदात्तो बंधुनि किं। गार्गीप्रियः। अत्र पूर्वपदप्रकृतिस्वर एव। तत्सुरूपे सर्वत्रान्तोदात्तावेति। नि
ष्ठोपसर्गपूर्वमन्यतरस्यां। बहुव्रीहौ सोपसर्गं निष्ठान्तं पूर्वपदमन्तोदात्तं वा स्यात्। प्रक्षालितपादः। प्रधौतमुखः। क्षल शौ
चकर्मणि चुरादिः। धावु गतिशुद्ध्योः। छ्वोः शूड्। ऊठि वृद्धिः। प्रक्षालितप्रधौतौ गतिस्वरेणाद्युदात्तौ। यदि मुखशब्दः सौम
वाचीन दा निष्ठोपमानादन्यतरस्यामित्ययमपि स्वरो भवति। अन्यदा तु द्वावेव स्वरौ निष्ठा किं। प्रसेवकमुखः। कृदुत्तरपद

३६

प्रकृतिस्वरेण लित्वान्मध्योदात्तः प्रसेवकः । उपसर्गपूर्वं किं । शुष्कमुखः । शुष्कपृष्ठ इत्याद्युदात्तः शुष्क ४ । उत्तरपदादिः ॥
अधिकारसूत्रमिदं । उत्तरपदस्येत्यापादपरिसमाप्तेरधिक्रियते । आदिरिति प्रकृत्याभगालमिति यावत् । कर्णो वर्णलक्षणा-
त् । वर्णवाचिनो लक्षणवाचिनश्च कर्णशब्द उत्तरपदमाद्युदात्तं स्याद्बहुव्रीहौ । शुक्लकर्णः ४ । कृष्णकर्णः । लक्षणात् । दात्रं
शंकुर्वा कर्णो यस्य स दात्राकर्णः । शंकुकर्णः । गड्वादिभ्यः परवचनमिति परनिपातः । कर्णो लक्षणस्येति दीर्घत्वं । पञ्चनो विभा-
गकानां ? दात्रशंकुप्रतिरूपकं यत्कर्णादिषु चिह्नं क्रियते तदिह लक्षणं गृह्यते । एवं वर्णग्रहणात्तेन स्थूलकर्णः इ-
त्यत्र न भवति । श्वर्जिपिंजादिभ्य उरोलचौ इति तिष्ठते रूलच् वा हुलकादाकारलोपः । कर्णः किं । श्वेतपादः । श्विता वर्णो य
चाघचो ? वर्णलक्षणात् किं । शोभनकर्णः । शुभ शोभार्थौ । अनुदात्तेतश्च हलादेरिति युच् । प्रत्युदाहरणे सर्वत्र पूर्वपदप्र-
कृतिस्वर एव । तत्पुरुषे तु अन्तोदात्तत्वमेवेति सर्वत्रेत्युक्तं । संज्ञौपम्ययोश्च ॥ संज्ञायामौपम्ये च यो बहुव्रीहिस्तत्र कर्णश-
ब्द उत्तरपदमाद्युदात्तं स्यात् । संज्ञायां । कुंचकर्णः । औपम्ये । गोकर्णः । खरकर्णः । कंठपृष्ठग्रीवाजंघं च ॥ कंठादीन्युत्त-
रपदानि संज्ञौपम्ययोराद्युदात्तानि स्युर्बहुव्रीहौ । संज्ञायामौपम्ये च यथा । नीलकंठः । कांडपृष्ठः ४ । नीलग्रीवः । तालजंघः । रा.म.०
औपम्ये । खरकंठः ४ । गोपृष्ठः । गोग्रीवः । गोजंघः ४ । सुग्रीव इत्यत्र परत्वान्नञ्सुभ्यामिति भवति । शृंगमवस्थायां च ॥ बहु- ३६
व्रीहौ शृंगशब्द उत्तरपदमाद्युदात्तं स्यादवस्थायां संज्ञौपम्ययोश्च । उद्गतशृंगः । द्व्यंगुलशृंगः । अत्र शृंगजननादिकृतो

गवादेर्वयोविशेषो वस्तु गम्यते। संज्ञायां। त्रयश्शृंगाः। औपम्ये। गोशृंगः। अवस्थादिषु किं। स्थूलशृंगः। नञो जरमरमित्रमृताः।
नञ उत्तरपदानि जरादीनि बहुव्रीहावाद्युदात्तानि स्युः। अजरः। अमरः। अमित्रः। अमृतः। नञ्सुभ्यामित्यस्यापवादोयं। जरश
जरः। ऋदोरप्। मरणं मरः। अस्मादेव निपातनादप्। अमिचिमिदिशसिभ्यः क्त्रः। नञः किं। ब्राह्मणमित्रः। जरादयः किं। अशत्रु।
तत्पुरुषे पूर्वपदप्रकृतिस्वरः। बहोर्नञ्वदुत्तरपदभूम्नि। उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्ये
व स्वरः स्यात्। बहवो जरादयो यस्य सः बहुजरः बहुमरः बहुमित्रः। बहुमृतः। उत्तरपदभूम्नि किं। बहुषु जरो यस्य स बहु
जरः। पूर्वप्रकृतिस्वरः। सोर्मनसी अलोमोषसी। सोरुत्तरपदं लोमोषसी वर्जयित्वा मन्नन्तं असन्तं चाद्युदात्तं स्याद् बहुव्रीहौ।
सुकर्मा। सुशर्मा। कृभृञ्भ्यां मनिन्। सुपयाः। सुयशाः। सुस्रोताः। असुन्प्रकरणेपि वतेश्चित्। अशेर्देवने युट् च। स्रुरीभ्यां
तुट् च इति सूत्रैः एते असुन्नन्ताः। अमिनेस्मन् ह्रस्वान्यर्थवृत्ता चानकैर्थैर्निचतदेतविधिं प्रयोजयंति। तेन सुप्रथिमा। पृ
थ्वादिभ्य इमनिच्। सुस्रमा। सुधरा। सुस्वं सुस्रु अधःपतेन्निक्विप् नलोपः दत्वस्यासिद्धत्वादसशब्दो या अत्रायं स्वरो भव
त्येव। सोः किं। कृतकर्मा। कृतयशाः। मनसी किं। सुराजा। अलोमोषसी किं। सुलोमा। सूषाः। नञ्सुभ्यामिति स्वरः। सुकर्म
कः। सुस्रोतस्कः। इत्यत्र परत्वात्कपि पूर्वमिति न भवति। शोभनाः दृषदः यस्मिन् सः सुदृषत्। अत्र प्रत्ययलक्षणेनासंतत्व
माश्रित्यायं स्वरो न भवति। प्रत्ययाप्रत्ययस्याधारणाश्रये कार्ये प्रत्ययलक्षणाभावात्। क्रत्वादयश्च। बहुव्रीहौ सोः

४० परेऽन्त्यवादयश्चाद्युदात्ताः। सुः। सुसाम्राज्याय सुक्रतुः। सुदृशीकरूपः। उदाहं च स्पूर्वहणा सुप्रतीकः। सुप्रतूर्तिमनेहसं। सुहवाः
सुभगः। आद्युदात्तं द्व्यच्छन्दसि। सोरुत्तरपदं यदाद्युदात्तं द्व्यच्कं तदाद्युदात्तमेव स्याच्छन्दसि। स्वश्वास्त्वा सुरथा मर्जयेम। अ-
शब्दपुर्षीति क्तिनं तो। ध्वः। हनिकुषिनीरमिकाशिभ्यः क्थन्। नित्वादाद्युदात्तो। सोः किं। अरथः। आद्युदात्तं किं। यासु वा-
हुः स्वंशुः। अजि दृशीत्यादिना कुप्रत्ययान्तो नोदात्तो बाहुः। द्व्यच् किं। सुगुरसत्सुहिरण्यः। द्व्यनेः कन्मने हिर चेति कन्यनन्त
हिरण्यमाद्युदात्तं द्व्यच्कं। वीरवीर्यौ च। सोरुत्तरे वीरवीर्यौ बहुव्रीहावाद्युदात्तौ छन्दसि स्यातां। सुवीरेण रयिणा जयेम। सुवीर्यस्य गो-
मतः। स्फायितञ्चीत्यादिना जेरक्। वीरेति। राजतः। वीरः। साधुवीर्यं। तत्र साधुरिति यत्। विल्वभक्ष्यवीर्याणि छन्दसीति वीर्य-
शब्दोऽन्तस्वरितः। भाषायां तु नञ्सुभ्यामिति स्वरः। क्थिते नित्या बहुञ्च बहुव्रीहावभसन्त। क्थित्यो। ह्रः। यादोह स्मादि त्वादाद्युदात्तः।
अभेः सन्ना। विकुषि शातिभ्यः क्थन्। नित्वादन्तो द्याद्युदात्तो। क्थितेः किं। दृशीनीय यादः। अनीयर्। उपोत्तमं रिति। दर्शनी-
या शब्दङ्यो नमोदात्तः। नित्या वद्व्यचे किं। क्थितिललाटः। नित्यालि किं। क्षितिककुत्। ककुदस्यावस्थायां लोपो विधीयते अन्यत्र क्षि-
तिककुदमित्येव भवतीति नायं नित्या वद्व्यच् अभसन्तं किं। क्षितिभसत्तावर्णीनां नरणां नितित। ना। नामित्याद्युदात्तः। क्षितिः रामं
सर्वपदप्रकृतिस्वरापवादोऽयं योगः। बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने। बहुव्रीहाविदमेतत्तद्भ्यः क्रि- ४
यागणने वर्तमानं प्रथमशब्दः पूरणाधिकारविहितप्रत्ययान्तं च यदुत्तरपदं तदन्तोदात्तं स्यात्। पूर्वपदप्रकृतिस्वर

पवादः। इदं प्रथमं गमनमागमनं वा यस्य स इदंप्रथमः। इदंतृतीयः। एतत्प्रथमः। एतद्द्वितीयः। तत्प्रथमः। तद्द्वितीयः। बहुव्री
हौ किं। अत्र बौ नेन प्रथमः इदं प्रथमः। तृतीयेति योगविभागात्समासः। अत्र तृतीया पूर्वपदप्रकृतिस्वरः। एषः किं। यत्प्र
थमः। एतयोः किं। तानि त्रीणि बहून्यस्य तद्बहुः। क्रियागणने किं। अयं प्रथम एषां त इदंप्रथमाः। द्रव्यगणनमेतत्। गणने किं। इदं गम
ने प्रथमं प्रधानं येषां त इदंप्रथमाः। उत्तरपदस्य कार्यित्वात्कपि पूर्वमन्तोदात्तं। इदंप्रथमकाः। उत्तरपदे वयवाः समासान्ता
इति पक्षेपि प्रथमपरस्यायोः इति विशिष्टरूपग्रहणात्कप्यत्रानेन मध्योदात्त उपान्त्योरे वस्वरः। ननु यत्रोत्तरपदं कवं
ते न तदुपान्तं। यत्रोच्चादि ते न तदुत्तरपदं कथामहोत्तरपदत्वादिति नात्र कपः स्वरप्रसंगो नामित्तेः पूर्वस्य न चोत्तरपद
वयवौ यौ प्रथमपरस्यायोः त्यौ तयोः स्वर इति वाच्यो इदं प्रथमगमनं द्वयोरिति प्रसंगः स्यादिति चेन्न। उत्तरपदग्रह
णामुपान्तस्योपलक्षणार्थं। प्रायेणाहि उपान्त्यमुत्तरपदं भवति। एवं सर्वत्र ज्ञेयो। संख्यायाः स्तनः। संख्यायाः परः स्तनशब्दोन्तो
दात्तः स्याद्बहुव्रीहौ। द्विस्तना। त्रिस्तना। संख्यायाः किं। दर्शनीयस्तना। स्तनः किं। द्विशिराः। विभाषा छंदसि। पूर्वसूत्रोक्तं छं
दसि वा स्यात्। द्विस्तना मंतोदात्ता। चतुस्तनमाद्युदात्तं। संज्ञायां मित्राजिनयोः। एवयोरुत्तरपदयोरन्तोदात्तः स्याद्बहुव्री
हौ संज्ञायां। देवमित्रः। बहुमित्रवृकाजिनः। कृष्णाजिनः। संज्ञायां किं। प्रियमित्रः। महाजिनः। ऋषिप्रतिषेधो मित्रे। विश्वा
मित्रऋषिः। मित्रे चर्षौ इति दीर्घः। अत्रैव बहुव्रीहौ विश्वं संज्ञायामित्येव भवति। अन्त। एवायिनोऽन्तः। स्ववधात्ववाचि

४१ तउत्तरपदं योतरशब्दः सोन्तोदात्तः स्याद्बहुव्रीहौ। वस्त्रमंतरं व्यवधायकं यस्य स वस्त्रांतरः। अंतरयतीत्यंतरं व्यवधिनः
किं। आत्मा स्वभाव अन्यो यस्य तत् आत्मांतरं। अंतरं किं। वस्त्रं व्यवधायकः। उदात्तशो प्रत्युदाहरणा च विशेषपरा स्वपरनिपा
तः। अस्मादि वस्त्रत्रातज्ञापकात्। मुखं स्वांगं। बहुव्रीहौ। स्वांगं मुखमुत्तरपदे अंतोदात्तं स्यात्। गौरमुखः। स्वांगं किं
गौरमुखा शाला। स्वांगमिहाद्रवं मूर्तिमदित्यादि लक्षणं गृह्यते। नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथु
वत्सेभ्यः। एभ्यः परो मुखशब्दोन्तोदात्तो न स्याद्बहुव्रीहौ। उच्चैर्मुखः। प्राङ्मुखः। गोमुखः। महामुखः। स्थूलमुखः। मु
ष्टिमुखः। पृथुमुखः। वत्समुखः। एषु पूर्वपदप्रकृतिस्वरेणान्तोदात्तं पूर्वपदं। तथाहि। उदि चेर्डैसिः। उच्चैः। अञ्चेर्लिंगं
तांचताव प्रत्यये। प्राङ्। गमेर्डोः। गौः। वर्तमाने पृषद्बृहन्महदित्यादिना महदिति ऽन्ते। खर्जपिंजादिभ्य ऊरोलचाविस्थू
लच्। मुषे। क्तिच्। चात्। मुष्टिः। प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्चेति कुः। पृथुः। वृतृवदीत्यादिना सः। वत्सः। ४। निष्ठोपमा
नादन्यतरस्यां। निष्ठान्तादुपमानवाचिनश्चोत्तरपदं मुखं स्वांगमन्तोदात्तं वा स्याद्बहुव्रीहौ। प्रक्षालितमुखः। पक्षे तद राम०
भावे निष्ठोपसर्गपूर्वमन्यतरस्यामिति पूर्वपदमन्तोदात्तं। तदभावे पूर्वपदप्रकृतिस्वरेण गतिस्वरः ४ प्रक्षालितमुखः
उपमानात्। व्याघ्रमुखः। पक्षे पूर्वपदप्रकृतिस्वरः। व्याघ्रादिघ्रातेश्च जातो इति कः। गोमुखमिव यस्य स गोमुखः ४१
एवं मुष्टिमुखः वत्समुखः। गौरिव मुखमस्येति विग्रहे पि गोमुखः मुष्टिमुखः वत्समुखः। इत्यत्र एनविकल्प

बाधित्वा एर्वाविप्रतिषेधेन निषेध एव भवतीति काशिका। भाष्ये नैतद्दृश्यते। जातिकालसुखादिभ्योनाच्छादनात्क्तोकृ
तमितप्रतिपन्नाः। जात्यादिभ्यः परं क्तान्तं बहुव्रीहावन्तोदात्तं स्यात् कृतमितान्वर्जयित्वा न चेदाच्छादनार्थात्परं क्तान्तं भव
ति। सारङ्गजग्धः। मासोजातोस्य मासजातः। सुखजातः। जात्यादिभ्यः किं। पुत्रजातः। पुत्रशब्दोन्तोदात्तः। अनाच्छाद
नात् किं। वस्त्रच्छन्नः। वसनच्छन्नः। वसेः ष्ट्रन्। ल्युट्। अकृतमितप्रतिपन्नाः किं। कुण्डकृतः। कुण्डमितः। कुण्डप्रतिपन्नः।
नञ्विषयस्येति कुण्डमाद्युदात्तं यदा तु मासो जातस्य मासजातः। कालाः परिमाणिनेति तत्पुरुषः तदान्तोदात्तत्वं
सिद्धं बहुव्रीह्यर्थं कालग्रहणं। वा जाते। जातिकालसुखादिभ्योनाच्छादनात्परो जातशब्दोन्तोदात्तो वा स्याद्बहु
व्रीहौ। दन्तजातः। स्तनजातः। मासजातः। सुखजातः। पक्षे पूर्वपदप्रकृतिस्वरः। दन्तस्तनौ स्वाङ्गशिटामदन्तानामित्या
द्युदात्तौ। ग्रामादीनां चेत्याद्युदात्तो मासः। खान्तस्यास्माद्देरित्यन्तोदात्तं सुखं। सुखदुःखतृप्रे स्फायितञ्चीति रक्तिस्तृप्र।
कृतेः छ कृच च कृच्छ्रो। अस्रे वाहुलकाद्रक्। असु अलीकादय श्चेतीकन् नेतो निपातः। अलीकप्रतिगताः आपोत्र प्रतीप
। कृच्छ्रदारिभ्य उनन्। करुणा। रुजेः क्युन्। बाहुलकात्। कृपेः। कृपणः। सहेः क्तः। सोढः। एते सुखादयः। नञ्सुभ्यां।
नञ्सुभ्यामुपरं यदुत्तरपदं तदन्तस्य समासस्यान्तउदात्तः स्याद्बहुव्रीहौ। अयवः। सुयवः। समासान्तानां उत्तरपदावय
वत्वेनान्वयाद्बहुव्रीहौ त्वकारस्योदात्तत्वं भवति। समासान्ताः समासावयवाः। अस्मिन्पक्षेऽस्मिन्नत्र समास

४२ स्वकार्यित्वमाश्रीयते कपिपर्वमिति ज्ञापकात् तेनाऽस्य च द्व्यादिसिद्धं अस्मिन्नेव सूत्रे समासस्य कार्यित्वं अन्यत्र स
मासान्तरहितस्योत्तरपदस्यैव कार्यित्वं इति अतेति सूत्रे भाष्यवार्त्तिकाभ्यां निश्चीयते कपिपर्वं नञ्सुभ्यां परस्यउ
त्तरपदांतदंतस्य समासस्य कपिपरे पर्वमुदात्तं स्यात् पर्वस्यापवादः अकुमारीको देशः सुकुमारीके व्रमवेधकः एदे
यहसांनुत्रसार्थात्स्वांते त्यात्यर्वे। नञ्सुभ्यां। मुत्तरपदस्य ह्रस्वांतस्यांतमात्सर्वमुदात्तं स्यात्कपिपरे। कपि पर्वमित्यस्यापवादः।
अयवको देशः सुयवकः। पर्वग्रहणानुवृत्तेरत्र द्वितीयो वाक्यार्थः क्रियते नञ्सुभ्यामुत्तरपदस्य ह्रस्वांतस्य कपि परे
स्यात् पर्वमेवोदात्तं स्यान्नान्यत्। तेन अज्ञकः सुज्ञकः। अर्थांत्स्यात् चेदुदात्तभावी नास्तीत्येतदभावे कपि पर्वमिति प्रा
प्तेतदनेन नियमेन व्यावर्त्यते नेन नञ्सुभ्यामिति कपः एवोदात्तत्वं भवति। बहोर्नञ्वदुत्तरपदभूम्नि। बहवो यवाः
यस्य बहुयवः। बहुकः। बहुकुमारीकः। बहुयवकः बहुज्ञकः। उत्तरपदभूम्नि किं। बहुषु मनो यस्य बहुमनाः बहु
प्रातिपदिकस्वरेणांतोदात्तः। न गुणादयोऽवयवाः। बहोरुत्तरेऽवयववाचिनो गुणादयो नभः यरि द्वबेनस्पुर्वे हु
श्रीहो बहुगुणा बहुगुणका वारज्जु। अवयवाः किं। बहुगुणो विप्रः कृताध्ययनसदाचारादयोऽत्र गुणा न तेन स्यादवय
वाः। गुणाः आमंत्रणशोचुरादेरेरचा गुणाः। अशेषः सह[illegible]स संछरोमीयमित्येते न घ्दोमानाः। बचः सुपर्वीकः सम रा.म०
।अधीयतेऽस्मादित्यध्यायः हृ ऊ ध्वे तिघञ्। एते गुणादयः। गुणादिराकृतिगणः। उपसर्गास्स्वांगं ध्रुवमपर्शु। प्रादि ४२

रुत्तरपदं क्रुं वंस्वांगवाचिपर्यन्तशब्दवर्जितमंतोदात्तं स्यात् बहुव्रीहौ ॥ प्रोदरः ॥ अललाटः ॥ नित्यं परे कल्पं तदिह क्रो
तिनेह न ॥ तुदहुः क्रोशति ॥ नहि वाहौर्नित्यं ऊर्ध्वदिग्वस्थाने ॥ उपसर्गात् किं ॥ दर्शनीयललाटः ॥ स्वांगे किं ॥ प्रशा
खो वृक्षः ॥ अपर्मे किं ॥ प्रपश्वः ॥ तेन तु रूपे ऽव्ययपर्वपदप्रकृतिस्वर एव ॥ द्वित्रिभ्यां षा मूर्ध्नः ॥ बहुव्रीहौ द्वित्रिभ्यां
परस्य दत्तमूर्धन एष उत्तरपदेषु स्तुअंत उदात्तो वा स्यात् बहुव्रीहौ ॥ द्वौ पादौ यस्य द्वियात् संख्यासुपूर्वस्येति पाद
स्य लोपः ॥ द्विदन् ॥ वय सिद्धं तस्य दत्त ॥ द्विमूर्धा त्रिपाद ॥ त्रिदन् त्रिमूर्धा ॥ द्वित्रिभ्यां षमूर्ध्नः ॥ द्विमूर्धः त्रिमूर्धः ॥ पूर्व
त्तरपदस्यांतोदात्तत्वे कृते टिलोपे च उदात्तनिवृत्तिस्वरेण अंत्योदात्तत्वं सिद्धं ॥ पक्षे ऽस्य कृतान्तानि रूपाणि ॥ द्वित्रिभ्यां
किं ॥ कल्याणमूर्धा ॥ लघावंते इति मध्योदात्तः कल्याणशब्दः ॥ पादादिषु किं ॥ द्विहस्तः ॥ बहुव्रीहौ किं ॥ द्वयोर्मूर्धा द्विमू
र्धा ॥ बहुव्रीहौ सक्थ्यक्ष्णोः इत्यतः षचो नुवृत्तौ सत्यां द्वित्रिभ्यां मूर्ध्नः षवचनं समासांतविधेर्नित्यत्वं ज्ञापयति
॥ तथा हि ॥ यद्यत्र षच्न स्यात् तत् दाचित्वादंतोदात्तत्वमेव स्यात् अस्य विकल्पस्य समासांताभावो विषयः स्यात् ॥ षचि तु
सति षचि कृते ऽकृते ऽकृते वा चित्ताभावादयं विकल्पो भवति ॥ इदं तु समासांतविधेर्नित्यत्वेन विनानुपपन्नं
सत्ज्ञापयति ॥ तेन द्विमूर्धः त्रिमूर्ध इति रूपसिद्धिः ॥ सक्थ्यचाक्रांतात् ॥ बहुव्रीहौ सक्थ्यक्ष्णोः इति षचेतः स

क्यपश्छन्तोदात्तो वास्मात्स चेत्कशब्दान्तात्परो न भवति चित्वान्नित्यमन्तोदात्तत्वे प्राप्तेऽयं विकल्पः। गौरस
क्थ। पक्षे पूर्वपदप्रकृतिस्वरः। अनुक्तौ गौरश्यो यदि शितिगोरस्य पर्यायेणाद्यन्तावुदात्तौ। तेनात्र त्रैस्वर्यं। अको
ताल्किं चक्रसक्थ्यः। अत्र चित्वान्नित्यमेवान्तोदात्तत्वं समासान्ताः यद्युत्तरपदावयवास्तदात्ते पुंसमासः। तथा
चैकं चेत्सक्थं विमलापसरं अत्र सति शिष्टत्वाद्बहुव्रीहिस्वरो भवति। एकशब्द हृदयीकेमिकनेत आद्युदा
त्तः विमलशब्दोऽपि बहुव्रीहिरायुदात्तः। यदा तु समासस्यावयवास्तदा समासेयरत्वात्स्वरे च कृते समासान्ता इ
ति सति शिष्टत्वात्समासान्तस्वरः प्राप्नोति। तुच्छब्जादीनां चित्वेच्छायथ यति सति शिष्टोऽपि समासान्तस्वरः
समासपूर्वपदस्वरं न बाधते समासान्तोदात्तत्वं तु बाधत एव। तेन विस्पोपः विलुपुर इति सिद्धं इति यद्
पूर्वं समासान्ताः प्रवर्त्तन्ते। पश्चात्समासस्वर इति ज्ञापयति तेन बहुव्योः पक्षयोर्भेदो नास्ति अथवा समासाम
कृप्रक्रियावाक्ये एव समासार्थानां सर्वेषां पदानामवयवाः समासान्ताः प्रवर्त्तन्ते पश्चात्समासाः। एवं सति बहु
गोमत्का बहुचर्मिका बहुघरिका बहुकुमारीक इत्यादि सर्वं सिध्यतीति अयमेव पक्षो युक्तः। आसन्नदशाः
अधिकविंशाः। लोहिताक्ष इत्यादि बहुव्रीहिषु पिचित्वादन्तोदात्तत्वमेव। तत्पुरुषे तुल्यार्थतृतीयासप्तम्यु
पमानाव्ययद्वितीयाकृत्याः। तत्पुरुषे एतानि पूर्वपदानि प्रकृतिस्वराणि स्युः। तुल्यार्थः। तुल्यलोहितः। तुल्य

लोहितः तत्तुल्यमहानासहकृन्वेलः। सहशामहान्। कृत्यतुल्याख्याजात्येति समासः। तौ वयाधर्मौ इति यति
यतो नाव इत्याद्युदात्तस्तुल्यः। समानान्यथा श्वेति छिंनेतः सहशशब्दः कृत्तुत्तरपदप्रकृतिस्वरेणान्तोदात्त-
। एवं सहशशब्दः कन्नंतो मध्योदात्तः। तृतीया। शंकुला खंडः किरिकाणः। तृतीया तदर्थकृतार्थेति समासः। शं
कुप्रवाल्लिते घेत्रर्थे कविधानमिति कइति का। शाल्योमूलचवादौ कातरशकिशंकाप्यात्र स्यादपीति
उणादयो बहुलमिति मन्त्रे केयरादयः। कृगृशृदृकु इति मिदि छिदिभ्य इति डस्त्रत्ययः। किरि ध्वम मी।
अश्वशोडः। समभी श्रोडैरिति समासः। अशरं वनेइति सः अक्षः शस्त्री श्यामा। कुमुदश्यनीहं सगमनान्यग्रो
ष पारिमंडला। उपमानानि सामान्यवचनैरिति समासः। शस्त्री गौरादिङीषंता। कौमादते कुमुदं मलविभु
जादित्वात्कः। थाथादिस्वरेणान्तोदात्ता दृढवदीत्यादिनासंज्ञेसः। यकरोहतीति न्यग्रोधः पवाघच न्यग्रोध
स्याच केवलेस्येति निपातनात् हस्वधः मध्योदात्तत्वं च अव्ययेनत्कुनिपातानामिति वक्तव्यं। अवाहगाः
। कुप्राहगाः नि: कौशांवि: अतिरेववदति हन्ति स्थंडादाहरणमयुक्तं परत्वादनेरकृत्वहेदुस्मंतोदात्तत्वे नभा
ब्रह्म। निपाता आद्युदात्ताः इति पातत्वादेवसिद्धे न भूयग्रहणं अकरणाशित्याद्योपरस्यापिकृत्स्वरस्य बाधनार्थं आ
क्रोशिनन्यनिम्प्रतिस्थदूत्यत्रतिस्त भयोजस्मदूतिसतिशिश्वस्यापि विभक्तिस्वरस्य बाधनार्थं। अचत्वारः। अ

नानडुहः। अत्र सति शिष्टस्यापामः स्वरस्य बाधनार्थं। अव्ययी। अत्र जिह्वक्षीत्यादिना धातुनाऽसमासे निपात्यते इतिः क्रियेतेत
४४ स्यापि स्वरस्य बाधनार्थं। कुग्रहणं चादिषु पाठाभावात्। प्रवित्तयोपसोऽव्ययसंज्ञार्थः। नियमः किमर्थः साभिहितं स्वयं धौ
तेस्नात्वा कालकइत्यादौ विदंमाभूत्समासानोऽसत्त्वमेव यथा स्यादिति द्वितीयामुहूर्तसुखं। कालाध्वनोरिति द्वितीयात्यं
तसंयोगे चेति समासः। मुहूर्तमात्रं: शीदण्डादिशतोदान्तः। कृत्याभोज्यलवणं। कृत्यतुल्याख्या इति समासः। भोज्य
वृणपदं तस्मिन्स्वरितमिति स्वरितः। कृत्यतुल्याख्या अजात्या इति प्रतिपदोक्तः समासोऽत्र स्वीक्रियते नेह न तुल्यहस्ती
। भोज्यहस्ती। अत्र विशेषणविशेष्येणेति समासः। ननु अजात्येति प्रतिषेधश्च तत्सामर्थ्यान्न दुर्लभो सो। तथेज्ञा
तिवचनस्य कृत्यतुल्याख्यैः समासे पूर्वनिपातानियमार्थमजात्येति प्रतिषेधः अन्यथा जातेः पूर्वनिपातेन
स्यादिति वाच्यं। जाति वचनस्य द्रव्यवचनत्वाद्द्रव्यस्य विशेष्यत्वमिति विशेषणं विशेष्येणेतिसूत्रे माभूत्स्यापि
तत्वात्सर्वथा जातेः पूर्वनिपातात्प्रसंगादिति चेत्। नैवं। अजात्येति नजात्या समासनिषेधार्थं। किं तु तुल्यहस्ती भो
ज्यहस्ती इत्यादिषु जात्या समासस्याप्रतिपदोक्तत्वेनैतत्स्वरनिहत्यर्थं। एवं तु परमपकं वलः परमहस्तीति सत्रेभा
ष्यप्रयोगात् तज्ज्ञापकः। प्रतिपदोक्त द्वितीया तृतीया सप्तमीसमासानां ग्रहणादिह न। परमं कारकं परमकारकं। परमेण
कारकेण। परमकारकेण। परमे कारके परमकारके परमकारके। नहि समानाधिकरणसमासः प्रथमोतानामेव

तिनियमः। कष्टश्रित इत्यादौ अहीने द्वितीये ति भाव्यं। वनातीत इत्यादौ थाथादिस्वरेणाभाव्यं। ग्रामगमीत्यादौ
णौ नि स्वरेणाभाव्यं स्वाङ्गात् प्रवृद्धादीनां चेति भाव्यं। तस्मान् मुहूर्तसुखादीत्येवात्रोदाहरणानि। आरूढं तं आग
तः इत्यादौ गतिसमासे कृते अस्मिन् स्वरे प्राप्ते। गतिकारकोपपदात् कृत इति। गतेः कारकादुपपदाच्चोत्तरपदं कृदन्तं प्रकृ
तिस्वरं स्यात्। इत्यन्तोदात्तत्वे प्राप्ते विमुक्त इत्यादौ मध्योदात्तत्वे प्राप्ते थाथघञ्क्ताजवित्रकाणाम्। गतिकारकोपप
दात्परं थ अथ घञ् क्त अच् अप् इत्र क इत्येवमेतमुत्तरपदमन्तोदात्तं स्यात्। इत्यन्तोदात्तत्वे प्राप्ते। गतिरनन्तरः।
कर्मणि क्तान्ते उत्तरपदे पूर्वपदं गतिः प्रकृतिस्वरा स्यात्। अपूर्वपदमपि क्रान्तधातुनाऽव्यवहितो गतिः प्रकृतिस्व
रा स्यात्। तेन आरूढं आगतः विमुक्त इत्यादित्याद्युदात्तमिष्यते। कर्मोपितशपर्थी सकर्मकात् कर्मणि क्तः। संश
वृत्यादीनां समासे मोव्यय स्वरे प्राप्ते तद्बाधित्वा कृत्स्वरेण आलुद्यादीनामाद्युदात्तत्वे प्राप्ते तद्बाधित्वा थाथादि
स्वरेणान्तोदात्तत्वे प्राप्ते ऽनेतरस्य ग्रहणादपूर्वपदस्यापि आङः स्वरः शिष्यते। समारूढं समागतः सं विमुक्तः। अत्र
मिसमागत इत्यत्राप्युक्तन्यायेन आङः एव स्वरः। हृदागतः। स्तोकान्तिकेति समासः पंचम्याः स्तोकादिभ्य
इत्यलुक्। अत्र समासस्वर कृत्स्वर थाथादिस्वरेषु प्राप्तेषु अनेन तरस्य ग्रहणसामर्थ्यादाङः स्वरे प्राप्ते। कारका
द्दत्तश्रुतयोरेवाशिषि सूत्रे योगविभागः क्रियते। कारकात्। कारकात्परं क्तान्तम् अन्तोदात्तं स्यात्। दूराऽगतः दूरागत इत्यादौ थाथादि

सत्रेशोवृषिरेद्गतिरवरवाधनाथीमिदं दुष्कृएजन्तः। अधीगर्थदयेशां कर्मणि। एषां कर्मणि शेषत्वेन विवक्षिते षष्ठी स
।तः। अधीगर्थः। स्मरणार्थाः हरेः स्मरणमपि चोदयनेईशने वा। षष्ठी शेषे इत्येव सिद्धे षष्ठीत्रवणार्थं वचनेन न समा
सो न भवतीति फलितं भवति। द्विसमासे प्रतिषेधः लुगपि स्यात्‌ स्वेलुकप्रकरण एव सूत्रकृत्यातेति न हरिसंबंधि स्मरण
मित्यर्थे हरिस्मरणमिति नेष्यते इति फलितोर्थः। हरिकर्मकं स्मरणमित्यर्थे हरिस्मरणमितीष्यत एव। सर्पिर्दयनं
सर्पिरीशनं करणेऽधिकरणे वा ल्युट्‌ इति नेह कुत्र पदे प्रकृति सर्पिषो शाक दान्तत्वं। भावे ल्युटि आनो भावकर्मवचनद्वयं तो
नत्वं भवत्येव। शेषषष्ठी समासेन तोदान्तत्वं स्यादिति तन्निवृत्त्यर्थं च सूत्रं। किंच हरेः स्मरन्नस्मुस्मूर्षुः स्मृत्वा स्मृतं स्मर्त्तीवे
त्यत्र समासनिवृत्त्यर्थं। हरेः स्मारकः स्मर्त्तेत्यत्र च समासाभावार्थं च। कर्मणि तु तृजकाभ्यामिति समासो निषिद्धः। ए
वं प्रयोजनत्रयेपि स्वरस्यापि प्रयोजनत्वादत्र सूत्रस्योपन्यासः। एवमुत्तरत्रापि प्रयोजनान्यूहनीयानि। कृञः प्रति
यत्ने। करोतेः कर्मणि शेषे षष्ठी स्यात्‌ गुणाधाने। एधोदकस्योपस्करणं। अन्यत्रैधोदकोपकरणं। एधोदकोपस्करणं शेष
षष्ठ्यापि समासे तोदान्तत्वं कर्मषष्ठीसमासे कृद्वृकाप्रउदात्तः। भावे ल्युटि अतोदान्तत्वमेव। रुजार्थानां भावव
चनानामज्वरेः। अत्राज्वरिसंतापयोरिति वाच्यं। भावकर्तृकाणां ज्वरिसंतापिवर्जितानां व्याध्यर्थानां कर्मणि
शेषे षष्ठी स्यात्‌। रोगस्य चौरस्य रुजा। रुजातो भंजेभिदादित्वादङ्‌। प्रत्युदाहरणे तु रोगस्य चोरस्मरणं विषयस्य

ए.म.
४५

चोरस्य रुजा रोगस्य चोरज्वरः। चोरज्वरः चोरसंतापो वा। पूर्ववज्ज्वरस्यावस्था-रोगस्य चोरस्य ताप इत्युदाहरणमेव। नयेर्हेतु
मत्त्वं तदिह च भावे। आशिषि नाथः। आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्। सर्पिषो नाथनं। आशिषि किं। माण
वकनाथनं। कर्मषष्ठी समासमाणवकनाथनं। सर्पिर्नाथनं नमिति आशिषि नेष्यते याञ्चादाविष्यते इति फलितोर्थः।
जासिनिप्रहणनाटक्राथपिषां हिंसायां। हिंसार्थानामेषां कर्मणि शेषे षष्ठी स्यात्। चोरस्योज्जासनं। निप्रौ संहतौ
तौ व्यस्तौ विपर्यस्तौ वा। चोरस्य निप्रहणनं। निहननं। प्रहणनं। प्रणिहननं वा। चोरस्योन्नाटनं। निप्रौ संहतौ व्यस्तौ
विपर्यस्तौ वा। चोरस्य निप्रहणनं। निहननं। प्रहणनं। प्रणिहननं वा चोरस्योन्नाटनं। चोरस्य क्राथनं। चोरस्य पेष
णं। जसु ताडने जसु हिंसायामिति चुरादीगणे त्वेते जसु मोक्षणे इति दैवादिकस्य न ग्रहणं दीर्घनिर्देशात्। यद्यप्य
स्य हेतुमण्यो जासीति सिध्यति तथापि हिंसार्थत्वाभावात् चोरोज्जासनं। एवं नटनुन्नादितिघटादेस्य ग्रहणं। चोरो
न्नाटनं। घटादिभिन्नस्य नाटेश्चौरादिकस्य ग्रहणं। कथं हिंसायामिति घटादेरपि निपातनाद्वृद्धिः। मित्त्वं तु चिण्णमुले
रिति दीर्घविकल्पार्थं हिंसायां किं। धानापेषणं। सर्वेषूदाहरणेषु कर्मषष्ठीसमासे तु कृदुत्तरपदप्रकृतिस्वरो भव
भावे ल्युटि क्रियो भावकर्मवचन इत्येतदाह तेत्वं भवत्येव। व्यवहृपणोः समर्थयोः। एतयोः कर्मणि शेषे षष्ठी स्यात्। द्यू
ते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता। शतस्य व्यवहरणं पणनं वा। शतसंबंधी क्रयविक्रयरूपेण विनियोगो

देवनेनेत्यर्थः। समर्थयोः किं। शलाकाव्यवहारः। गणनेनेत्यर्थः। ब्राह्मणपराणन्नं कृतिरित्यर्थः। सर्वेषूदाहरणेषु क-
र्मणि षष्ठीसमासे यथायोगं थाथादिस्वरः कृदुत्तरपदप्रकृतिस्वरः। अनो भावकर्मवचन इति स्वरश्च ज्ञेयः। ज्ञो विदर्थ-
स्य करणे। जानातेरज्ञानार्थस्य करणे कारके शेषे षष्ठी स्यात्। सर्पिषो ज्ञापकः। सर्पिः संबंधिज्ञानपूर्वकप्रवृत्तिम-
नित्यर्थः। करणत्वविवक्षायां तु तृतीयेति योगविभागात्साधनं कृतेति वा समासे पूर्वपदप्रकृतिस्वरं वाधित्वायस्त्वा-
त्कृत्स्वरः। सर्पिर्ज्ञापकः। अविदर्थस्य किं। सर्पिज्ञापकः। सर्पिषो ज्ञातेत्यर्थः। कृत्वोर्थप्रयोगे कालेधिकरणे।
कृत्वोर्थानां प्रयोगे कालेधिकरणे शेषे षष्ठी स्यात्। पंचकृत्वोह्नो भोजकः। कृत्वोर्थेति किं। अह्नि भोजकः। शेषे किं।
। अधिकरणे सप्तम्यां सप्तमीति योगविभागात्तत्क्षेपइति वा समासे सप्तमीपूर्वपदप्रकृतिस्वरं वाधित्वा कृत्स्वरः।
पंचकृत्वस्त्वह्नि भोजकः। न निर्धारणे। निर्धारणे या षष्ठी सा न समस्यते। सप्तमी तु समस्यत एवेति न पूर्वप-
दप्रकृतिस्वरोऽभवेति पुरुषोत्तमः। नाजोत्तमः। षष्ठी समासेंतोदात्तं स्यात्। पूरणगुणेति सूत्रेण तव्येन स-
मासो निषिध्यते। ब्राह्मणस्य कर्तव्यं। तव्यता त्वसमासेंतोदात्तं स्यात्। पूरणगुणेति सूत्रेण तव्येन समासो
निषिध्यते। ब्राह्मणस्य कर्तव्यं। तव्यता त्वसमासे कृत्स्वरे ब्राह्मणकर्तव्यमितीष्यते। ब्राह्मणकर्तव्यमिति
ष्यत इति फलितं। तृजकाभ्यां कर्तरीति कर्मषष्ठ्यास्तृजकाभ्यां समासो निषिध्यते। ओदनस्य पाचकः। शेषषष्ठ्या

भवत्येवा। ओदनपाचकः। ओदनपाचक इति नैष्यत इति फलितं। एवं प्रकारेण स्वरान्ते यः। वर्णो वर्णेष्वनेते। ए
तशब्दवर्जिते वर्णवाचिन्युत्तरपदे परे वर्णवाचि पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। कृष्णसारङ्गः। लोहितसारं
गः। कृष्णवर्णे इति न कृ। कृष्णाश्यामगोरख्या च हीति वेदेन्तोदात्तः। भाषायां तु शितितितानामित्याद्युदात्तः
। रुहे रश्च लो वा इति इतन्प्रत्ययान्तत्वादाद्युदात्तो लोहितः। वर्णः किं। परमकृष्णः। वर्णेषु किं। कृष्णतिलाः। एतं कव
र्णग्रहणं व्यर्थं वर्णो वर्णेनेति प्रतिपदोक्तस्य ग्रहणात्। अनेते किं। कृष्णैतः। गाधलवणयोः प्रमाणे। प्रमाण
वाचिनि तत्पुरुषे गाधलवणयोरुत्तरपदयोः पूर्वपदं प्रकृतिस्वरं स्यात्। शंबगाधं जलं। अरित्रगाधं जलं। तत्प्र
माणमित्यर्थः। गोलवणं। अश्वलवणं। यावद्गवे दीयते तावदित्यर्थः। षष्ठीसमासा एते। शमेर्वन्। शंबः। अर्तिल
धूसूखनसहचर इत्रः। अरित्रं। गमेर्डोः। गौः। अशूप्रुषिलटीत्यादिना क्वन्। अश्वः। प्रमाणे किं। परमगाधं। प
मलवणं। दायाद्यं दायादे। दायादशब्द उत्तरपदे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। विद्यायाः दा
यादः। विद्यादायादः। धनदायादः। संज्ञायां समजेति क्यबुदात्तः। विद्या। कृपृवृजिमन्दिनिधाञः क्युः। बहुलवचना
त्केवलादपि धात्वोः क्युप्रत्ययस्वरेणाद्युदात्तं धनं विद्याया इति स्वामीश्वरे इति संबन्धसामान्ये षष्ठी। दीयते स दायः। भा
गः। अंशः। तमादत्ते सः दायादः। मूलविभुजादित्वात्कः। तस्य भावो दायाद्यं दायस्यादानं तत्संबन्धी वा इह तु दायाद्य

८७ शब्द आदीयमाने दाये शब्दवर्त्तते। दायाद्यं किं परमदायादः प्रसुदायशो भुममासांतो दात्तत्वमेव। प्रतिवंधिचि
रकृछ्रयोः। चिरकृछ्रयोरुत्तरपदयोः प्रतिवंधिवाचिपूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। गमनचिरं। गमनकृछ्रं।
आहरणचिरं। व्याहरणकृछ्रं। गमनव्याहरणशब्दौ ल्युडादिमध्योदात्तौ। विशेषणसमासो मपरत्वं मकादि
वशिमन्ने हि कारणविकलतया चिरकालभाविकृछ्रयोगिवा प्रतिवंधि जायेते। प्रतिवंधि किं मुत्रके छ्रं। पदेऽ
पदेशे। व्याजवाचिनि पदशब्दे उत्तरपदे पूर्वपदं प्रकृत्या स्यात्तत्पुरुषे। मत्रपदेन प्रस्थितः। उच्चारपदेन स्नान
पदेन प्रस्थितः। स्नानस्य मिषं कृत्वा पलायित इत्यर्थः। सिचि मुत्रोष्टिकृचेति ष्ट्रन्। मत्रं। उच्चारो घत्रे तस्याप्या
दिस्वरेणांतोदात्तः। स्नानं ल्युडाद्युदात्तं। अपदेशे किं। विष्णोः पदं विष्णुपदं। निवाते वातत्राणे। वातत्राणार्थे निवा
तशब्दे उत्तरपदे पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। वातस्याभावो निवातमित्यव्ययीभावः। निरुद्धो वातो यस्मिन्नि
वातमिति वहुव्रीहिर्वा। कुटी एव निवातं कुटीनिवातं। शमीनिवातं। कुड्यनिवातं। आद्यो गौरादिङीषंतो। कवतेर्यत
उ कृचेति पाठे यंतो वा वेद इत्याद्युदात्तं कुड्यं। कवते ओ कू इति पावें तोदात्तो। कु आदि हेतु केथें वर्त्तमानाः कुप्रादयो निवात
तशब्देन समानाधिकरणा भवंति। वातत्राणे किं। राजनिवाते वसति। सुखं मातृनिवातं। षष्ठीसमासो। निवातशब्दः पा०
पार्श्वे रूढः। शारदेनार्तवे। शातो भव मात्तेवं। अनार्तववाचिनि शारदशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। रज्जु ८०

शारदं जलं । हृषच्छारदाः सक्तवः । रज्जुवद्वटुपाशः तेरज्जुशावृः । दृषत्पिष्टं सुहृत्पश्च हृः । नूतनवाची शारदशब्दः
आसवपदविग्रहः कर्मधारयः । इदानीमित्यकूपादुदकं तेन तेन जलमित्यर्थः । सञ्जेर् सुन्विति डप्रत्ययः । तत्र मूलोपदे
स्य नुटं तेर्धातुस्सकारलोपः । निदित्यधिकारादाकारान्तो रज्जुशब्दः । दृशाते: सुकूरूस्थश्लेत्य दृढहस्त इत्यनाति वैकिम
रमशारदं । शारदिक्नतो भवे शारदं । अध्वर्युकषाययोर्जातौ । अध्वर्युकषाययोरुत्तरपदस्थयोः पर्वपदं प्रकृतिस्वरं स्यात्सु
तिवाचिनि तत्पुरुषे । प्राच्याध्वर्युः कवाध्वर्युः । कालायाध्वर्युः । एते कर्मधारया अष्टरणा विशेषनियताः । षक प्राग्गपाणि
तियत्यि आघदान्तः प्राच्याः प्यचाघजैतः कवः । तेन प्रोक्तमधीते वैशंपायनान्तेवासित्वाणिनिः तस्य कवचरकाल्लु
कृ अस्मैत्रणाः प्रोक्ताल्लुक् । लापिनाप्रोक्तमधीते कलापिनो णः । इनण्यनपत्ये इति प्रकृतिभावे प्राप्ते नान्तस्य टि
लोपस्य ब्रह्मचारि पीठसर्पि कलापि इशब्दाः शोते । सर्पिर्मेडामा पुष्य शाखेशी बहीसमासात्वं तो दानो । दूरेनियुक्त
इति ठकि दौवारिकोऽप्यमोदान्तः । नातो किं । परमाध्वर्युः परमकषायः सदृशप्रतिरूपयोः सादृश्ये सादृश्यवाचि
नि तत्पुरुषे सदृशप्रतिरूपयोः पूर्वपदं प्रकृतिस्वरं स्यात् । मातृसदृशः पितृसदृशः मातृपितृशब्दावुणादित्वाज्जे
तो । षष्ठीसमासार्थं सदृशग्रहणं । तृतीयासमासे तु तत्पुरुषे तुल्यार्थेत्येव सिद्धा । अलुक्षष्ठीसमासार्थं वा सदृश
शग्रहणं । दास्याः सदृशो वृषल्याः सदृशः । दस्तो नेत्र आवादासः । द्विगौ क्रतौ । डीपूडदान्तनिवृत्तिस्वरः वृषलीगानि:

ङीषंताऽभयत्रापि उदात्तयणो हल्पूर्वादिति विभक्तिरुदात्ता। षष्ठ्या आक्रोशे इत्यलुक्। पितृप्रतिरूपः सादृश्ये
कि। परममहान्तः। समासार्थः एकज्ञानसादृश्ये द्विगोः प्रमाणे। प्रमाणवाचिनि द्विगावुत्तरपदे पूर्वपदं प्रकृतिस्वरं
स्यात्तत्पुरुषे। सप्तसमाः प्रमाणमस्य प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक्। प्राच्यसप्तसमः सप्तसमः प्राच्यस
प्तसमः। गांधारिसप्तसमः। प्राच्यो यदंतत्वादाद्युदात्तः। गांधारिः कर्दमादीनां चेत्याद्युदात्तो मध्योदात्तो वा द्विगो
किं। व्रीहिप्रस्थः। प्रमाणे किं। प्राच्यसप्तसमं। समाहारेऽपि द्विगुः पात्रादित्वात् स्त्रीत्वाभावः। गंतव्यपण्यं वाणि
जे। वाणिजे परिपरे गंतव्यवाचिनि च पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। मद्रवाणिजः। काश्मीरवाणिजः। गांधारि
वाणिजः। स्फायितंचीति रक्। मद्रः कश्मीरेऽव्युत्पन्नप्रातिपदिकं लघावंत इति मध्योदात्तं व्युत्पत्तिपक्षे
कशेर्मुट् चेति ईरन्नंतत्वेऽपि पृषोदरादिमध्योदात्तं। गांधारिः पूर्ववत्। अत्रेऽन्तस्वरः। सप्तमीति योगविभागात् समा
सः। इति काशिकाप्रद्युम्नादिवृत्तात्वा व्यवहरंतीत्यर्थः। परस्प। गोवाणिजः। अश्ववाणिजः। गमेर्डोः। अशेः क्वन्। वाणि
जेव वाणिजः। प्रज्ञादित्वाद् दण्। मात्रोपज्ञोपक्रमच्छाये नपुंसके। मात्रादिषु नपुंसकलिंगे तत्पुरुषे पूर्वपदं प्रकृ
तिस्वरं स्यात्। भिक्षामात्रं न ददाति। समुद्रमात्रं सरो नास्ति। मात्रशब्दोऽपहलादिविवचेत्तुल्यप्रमाणे वर्तते। भिक्षाया
स्तुल्यप्रमाणं भिक्षामात्रमस्वपदविग्रहः षष्ठीतत्पुरुषः। भिक्षाशब्दो गुरोश्च हल इति अप्रत्ययांतः। स्फायितंचीति रक्। कि

रूस्वे रोणामसुद्रोंतोदात्तः ॥ उपज्ञापाणिन्युपज्ञं व्यासोपज्ञं व्याडिआपिशल्युपज्ञं दुष्करं तत्वादाद्युदात्तानि ॥ उपक्रमानंदोपक्र
मं व्याड्योपक्रमं नैरं पंचापज्ञं तं तः । आड्यः पूर्वीं तच्चायते धर्मजयं क विधानमिति कर्मणि कः । व्यालोपः १९ बोदरादि
त्वात् हस्वस्य छः । यथायथादिस्वरेणान्तोदात्ते आढ्यः । छायादिषु छायं यथानुरछायं पूर्वे: किं चेत् तु प्रत्ययान्त इञ् अन्त । नित्य
धिकाराद्युदात्तः । अस्ति पूर्व पियजितनिवनितपिभ्यामित्व इति इसि प्रत्ययान्तो धनुराद्युदात्तः । सर्वत्र षष्ठीसमासः
॥ उपज्ञोपक्रममिति सप्तभ्यां क्लीवत्वान्नपुंसके किं कुड्यच्छाया ॥ सुखप्रिययोर्हिते ॥ सुखप्रिययोः प्रयोर्हित
वाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । गमनसुखं । गमनप्रियं । तु दूरस्य । समानाधिकरणसमासे । हि
ते किं । परमसुखं । परमप्रियं । प्रीतौ च ॥ सुखप्रिययोः प्रयोगे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् प्रीतौ गम्यायां ।
ब्राह्मणसुखं पायसं । छात्रप्रियोऽनध्यायः । कन्याप्रियो मृदंगः । सुखप्रिययोः प्रीत्यव्यभिचाराद्धि हयत्प्रीतिग्र
हणं तत्प्रीत्यतिशयप्रतिपत्त्यर्थं । ब्राह्मणछात्री प्रत्ययस्वरेणान्तोदात्तौ । धान्यकन्याराजन्यमनुष्याणामं
तेदात्ति स्वरितावकन्याशब्दः । प्रीतौ किं । राजसुखं । राजप्रियं । स्वं स्वामिनि ॥ स्वामिनि शब्दे परे स्ववाचि पूर्वपदं
प्रकृतिस्वरं स्यात् । गोस्वामी । अश्वस्वामी । धनस्वामी । गोऽश्वधनाः कथितस्वराः । स्वं किं । परमस्वामी प्रत्यावे अश्वप
। ऐश्वर्यार्थपतिशब्दे पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे । गोपतिः । अश्वपतिः । धनपतिः । धान्यपतिः । सेनापतिः

४९ नरपतिः। गृहपतिः। गोऽश्ववनानामुक्तः स्वरः। धान्यस्यापि तां तं क्रिकूजसि इष्यन्य निस्व पिभ्योनित इति नप्रत्यये समाश
शनन्त्र्याद्युदात्तः। गृहे कउतिकप्रत्ययांतत्वात्। गृहं। नृनयेऋदारपनड। ऐश्वर्ये किं। वृषलीपतिर्विप्रः वृषल्या भर्तेत्यर्थः। न
भूवाक्चिद्दिधिषु। पतिशब्दे परे भूवाक्चित्दिधिषुशब्दाः प्रकृतिस्वरा न स्युः ऐश्वर्ये प्राप्ते निषिध्यते भूपतिः। वाक्प
तिः। दिधिषूपतिः। षष्ठीसमासाः अंतोदात्ताः। त्रियः क्विवंतः। अंत्यदुप्रत्ययांतः। वा भुवनं। पतिशब्दे परे भुवनशब्दः
पूर्वपदप्रकृतिस्वरं वा स्यात् पत्यावैश्वर्ये इति प्राप्ते विकल्पोयं। भुवनपतिः। आद्युदात्तः अंतोदात्तो वा। भसुभूभ
सिभ्यश्छंदसि इति क्युन् बहुलवचनात् द्वाघायामपि भुवनशब्दः प्रयुज्यते। आशंकाबाधनेदीयस्सु संभावने। आ
शंकादिषूत्तरपदेषु संभावनवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात्। अस्तित्वनिश्चयः संभावनं। गमनमाशंकं
वर्तते। वचनाशंकं। गमनमाशंक्यते इति संभाव्यते। गमनाबाधं। वचनाबाधं। गमनमाबाध्यते इति संभाव्यते
। शंकि शंकायां बाधृ लोडने आङ्पूर्वाभ्यां कर्मणि घञ्। गमननेदीयः। वचननेदीयः। अंतिकशब्दे नंतिक इति
नेदीयादेशः अतिशयेनांतिकं गमनं संभाव्यते। पूर्वेत्रांतिस्वरः। विशेषणसमासाः। भूपूर्वासकादयो वा। संभावने
किं। परमनेदीयः। पूर्वे भूतपूर्वः। भूतपूर्वोर्थे पूर्वशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे। आढ्यो भूतपूर्वः आढ्य राम:
पूर्वः पूर्वशब्दो ह्यतीतविषये भूतपूर्वेर्थे वर्तते विशेषणसमासः। भूपूर्वासकादिर्वा। आढ्यशब्दः स्थाथादिस्वरेणांतो ४९

दान्तः। भूतपूर्वे किं। परमश्चासौ पूर्वश्च परमपूर्वः। अत्रापि परमश्चासौ भूतपूर्वश्चेति विग्रहे डदादरणामेवासविध
सनीडसमर्यादसवेशसदेशेषु सामीप्ये। सामीप्यार्थेषु सविधादिषु उत्तरपदेषु पूर्वपदं प्रकृतिस्वरं स्यात्तत्पुरुषे मद्र
सदेशं। मद्रारङ्गतं तोदान्तः। ञौ धाञः। कर्दमादीनां चेत्यर्थं दान्तो मध्योदात्तो वा। कश्मीरेल घा वृत इति मध्योदात्तः। सवि
धादीनां सहविषयाद्रत्येव मादिकाव्युत्पत्तिरेव केवलसमीपवाचिनस्तेन समुदायाः। मद्रादीनां सविधं समीपमित्य
र्थः। सामीप्ये किं। सह मर्यादया वर्तते समर्यादं क्षेत्रं देवदत्तस्य समर्यादं देवदत्तसमर्यादं। सविधादिषु किं। मद्रसमीपं।
विस्पष्टपटुकं। विस्पष्ट। विचित्र। विचित्र। व्यक्त। संपन्न। पटु। पंडित। कुशल। चपल। निपुण। स्पश बाधनस्पर्शनयोः अ
स्पशे पतनस्पष्टे वादान्ते ति निपातनस्पष्टेति। ञ्नितिस्वरः। चित्र चित्रीकरणे चुरादिः घप्रत्ययादेरचः परस्वरः। चिती सं
ज्ञाने निष्ठा। बहुव्रीहिस्वरः। अंजू व्यक्त्यादिषु क्तः। ञ्नितिस्वरेणाद्युदात्तः। उदात्तस्वरितयोः स्वरितयोरिति स्वरितादिः। पदेः
क्तः। कर्तरि थाथादिस्वरः। फलपाविनमिमनिजनां गुक् पटिनाकिश्वतश्चेति डुप्रत्ययः। तत्र नित्त्यधिकारात्पु
राद्युदात्तः। पडि गतौ क्तः। कुशान् लातीति कुशलः। कृत्स्वरः। यद्वा कुश इति सौत्रो धातुः। चप सान्त्वने श्राम्यो वृषाद
भ्यश्चिदिति कलप्रत्ययः। पुणाक मिणाक शुभे। इगुपधलक्षणः कः। थाथादिस्वरः। विस्पष्टं च पटु चेत्यादि विग्रहः। विस्प
ष्टादीनि शब्दप्रवृत्तिनिमित्तस्य विशेषणानि। न द्रव्यस्य। कटुकादिशब्दोऽगुणवद्द्रव्यमभिधीयते तदा समानाधिकर

५० रायभावात् कर्मधारयाभावे सुप्सुपेति समासः। तस्मात् सुरूपत्वेपि सूत्रपाठानुरोधादिदं सूत्रे मत्रोपमर्दनात्र ज्यावस्त
कन्याय वस्तुभावे कर्मधारयाऽऽदिषूत्तरपदेषु भावप्रत्ययान्तं पूर्वपदं प्रकृतिस्वरं स्यात् कर्मधारये। गमनश्रे
यः। गमनश्रेष्ठं। वचनज्यायः। वचनश्रेष्ठं। वचनावमं। गमनकनीयः। गमनकनिष्ठं। पापवत्ते विन्मतोर्लुक्। गम
नपापीयः। गमनपापिष्ठं। पूर्वपदे लिस्वरे ऽ ऽ अन्यद्। नाम्नादेशनामुत्तरपदे त्वा ममवा सामर्थ्यात्तदादिषु हे
रा। मपरवयस्कादित्वट्टाजहर्तादित्वा हुदाविशेषणस्य परनिपातः। आदिषु किं। गमनशोभनं। भावे किं। गम्यतेऽ
नगमनं। तच्छ्रेयो गमनश्रेयः कर्मधारये किं। गमनस्य श्रेयो गमनश्रेयः। कुमारश्च। कुमारशब्दः पूर्वपदं प्रकृतिस्व
च रं स्यात् कर्मधारये। कुमारी चासौ श्रमणा कुमारश्रमणा। कुमारः क्रीडायां पूर्वाचोदात्तः कुमारश्रमणादिभिरित्यस्य
वग्रहणं प्रतिपदोक्तत्वात्। केचित्तु सर्वस्यैव कर्मधारयस्य ग्रहणमिच्छन्ति। तथा च कुमारब्राह्मणाद्यत्र पूर्व
पदप्रकृतिस्वरत्वे मतभेदेन भवति। आदिः प्रत्येनसि प्रतिगतमेनसा प्रतिगतम एनो वायस्य स प्रत्येना। तत्र कि
न्तुत्तरपदे कुमारस्यादिरुदात्तः स्यात् कर्मधारये। कुमारप्रत्येनाः षष्ठीसमासे तूदात्तः। पूगे छन्दस्यतरस्यां। गोशा रा०म०
वाचिन्युत्तरपदे कर्मधारये कुमारस्यादिरुदात्तो वा स्यात्। कुमारलोहध्वजाः कुमारजीमूताः। पूगाच्ञ्यो ग्राम ५०
णीपूर्वादिति ञ्यस्य तद्राजस्य बहुष्विति लुक्। पक्षे कुमारश्चेति स्वरः। तत्र प्रतिपदोक्तस्य ग्रहणात् षष्ठीसमासे तो दा

त्तं ॥ इगंतकालकपालभगालशरावेषु द्विगौ ॥ इगंतादिषूत्तरपदेषु द्विगौ पूर्वपदं प्रकृतिस्वरं स्यात् पंच दश वा अ
रत्नयः प्रमाणमस्य पंचारत्निः दशारत्निः प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक्। काल। पंच मासान् वर्षान् भू
तो भावी वा पंचमास्यः निरैतु दशमास्यः। द्विगोर्यप् पंच वर्षा दश वर्षाः वर्षाल्लुक्चेति वको लुक्। पंचसु कपाले
षु संस्कृतः पंचसु भगालेषु संस्कृतः पंचसु शरावेषु संस्कृतः पंचकपालः दशकपालः पंचभगालः पंचशरावः दशश
रावः द्विगोर्लुगनपत्ये इत्यणो लुक्। पंचदशशब्दौ अत्र संख्याया इत्याद्युदात्तौ। इगंतादिषु किं पंचभिरश्वैः क्रीतः पं
चाश्वः अध्यर्धपूर्वेति ठको लुक्। द्विगौ किं परमारत्निः परमशरावः। पंचारत्नयो दशारत्नयः अत्र यणगुणयोर्बहिरंग
त्वेनासिद्धत्वात् ख्यानि वह्यावाद्यः अपं द्विगुस्वर इगंतलक्षणः प्रवर्तते। बह्वन्यतरस्याम्॥ इगंतादिषूत्तरपदेषु बहु
शब्दः पूर्वपदं द्विगौ प्रकृतिस्वरं स्यात् प्राप्तविभाषेयं। बहि डुः अस्मादौणादिके लघि कं स्वौ न लोपन्स्पेति कुप्रत्यये तो दा
त्तो बहुशब्दः। बहुरत्निः उदात्तस्वरितयोरित्यकारः स्वरितः। बहुमास्यः बहुकपालः बहुभगालः। बहुशरावः
पक्षे तोदात्तत्वं। पूर्ववद्विग्रह प्रत्ययलुक्प्रत्युदाहरणानि योजनीयानि। द्विगौ किं बहुकपालानि दिष्टिविता
स्त्योश्च॥ दिष्टिवितस्त्योः परतो द्विगौ पूर्वपदं प्रकृतिस्वरं वा स्यात् पंच दिष्टिः पंच वितस्तिः बहुवितस्तिः द्विदिष्टिर्वि
स्तीप्रमाणे। तेन मात्रचो लुक्। सप्तमी सिद्धशुष्कपक्वबंधेष्वकालात्॥ सिद्धादिषूत्तरपदेषु सप्तम्यंतं पूर्वपदं प्र

५१ प्रकृतिस्वरं स्यात्। सप्तमी कालवाचिभ्यश्चेत्त्वमभवतीति। सांकाश्यसिद्धः कांपिल्यसिद्धः। सांकाश्यकांपिल्यशब्दौ वुञ्
ञ्छणादिसूत्रे ण्यप्रत्ययांतावंतोदात्तौ। निधनशुष्कं। निधाञः क्युरिति निधनशब्दो दात्तं निधनं। कुंभीपक्वः। कल
शीपक्वः। भ्राष्ट्रपक्वः। कुंभकलशभ्राष्ट्रा जातिलक्षणो ङीष्। भ्राष्ट्रशब्दस्त्रिगमिनमिहनिविश्यशां वृद्धिश्चेति ष्ट्रन्।
संयोगादिलोपः। स्त्रश्चेति षत्वं। भ्राष्ट्रा चेकेवष्कः। हृजः। केहृद्वेति च क्रं। अकालात्किं पर्वाह्णसिद्धः। धार्यादिस
मासे वा द्रोऽयो यंगः। महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु महत्त्व
पूर्वपदं प्रकृतिस्वरं स्यात् व्रीह्यादिषूत्तरपदेषु। महाव्रीहिः। महापराह्णः। महागृष्टिः। महेष्वासः। महाजाबालः
महाभारः। महाभारतः। महाहैलिहिलः। महारौरवः। महाप्रवृद्धः। महत्त्ववृद्धौ वर्तमाने छंदसि महदिति अतिप्र
त्ययांतोऽतोदात्तः। तस्य प्रतिपदोक्तः समासो महदिति यः समास स्वरे वा यस्स्वरः तेन महतो व्रीहिर्महाव्रीहिरित्य
त्रांतोदात्तत्वमेव कर्मधारय निष्टे तत्रापि लक्षणप्रतिपदोक्तपरिभाषया अत्रैणपादि समासस्य ग्रहणा
दिह प्रवृद्धं शकृत्पद्यते। क्षुल्लकश्च वैश्वदेवे। क्षुल्लक महत्त्वे पूर्वपदं प्रकृतिस्वरेस्तः वैश्वदेवादिभिरव्य
यीभावसंभवात्। क्षचिद्ध्रुवं संभवतीति कापि पर्वीतरमाह चेपी तत्पुरुषे विषयादिपूर्वस्त्राणीति तत्पुरुषप्रक
रणाल्लिरवंतेष्वधंलातीति क्षुल्लंतस्मात्स्वात्तादिष्वुकः क्षुल्लकवैश्वदेवं। महावैश्वदेवं। कर्मधारयो। ढपूः सादि ग्र० ५१

सादिवाम्योः।। उष्ट्रः पूर्वपदं प्रकृतिस्वरं स्यात् सादिवाम्योः परतः। उष्ट्रसादिः। उष्ट्रवामिः। उपमिव निभ्यां किदिति इन्नन्तं
नउ एः कर्मधारयः षष्ठीसमासो वा।। गौः सादसादिसारथिषु।। गौशब्दः पूर्वपदं प्रकृतिस्वरं स्यात् सादादिषु उत्तरप
देषु। गोः सादः गोसादः सदेर्घञ् तेन समासः। यद्वा गां सादयतीति गोसादः सदेरण्यन्तात्कर्मण्यण्। गोस्मा
दे वशिनिः गोसादी गोसारथिः।। द्वयोः कुम्भ्वरापवादः। अंतस्य समासस्वरापवादः। कुरुगार्हपतरिक्तगुर्व
सूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलो दासीभाराणां च।। एषां समासानां दासीभारादे
श्च पूर्वपदं प्रकृतिस्वरं स्यात्। कुरुवृज्योर्गार्हपत इति वाच्यम्। कुरूणां वृजीनां च गार्हपतं कुरुगार्हपतं। वृज्यो
रुच्चेति कुप्रत्ययान्तोन्तोदात्तः। कुरुः। वृजि रिगुपधात्किदिति इन्नन्तः। इगन्तानां च द्व्यषामित्यादिर्द्वितीयो वाद्युदा
त्तः। एवं कुरुरपि। रिक्तगुरुः। रिक्ते विभाषेति आदिरन्तोदात्तः। असूतजरती। अश्लीलदृढरूपा। अश्लीलो
नञ्समासो वा घञन्तो। एते त्रयः कर्मधारयाः। पारेवडवेव पारेवडवा। निपातनादिवार्थे समासः। समस्यात्र
लुक्। पारशब्दः घृतादित्वादन्तोदात्तः। तितिलाः सन्त्यस्मिन्निति तैतिली छत्रोदरादित्वादिनिः। तितिलिनो
पत्यं तैतिलः। यद्वा छात्रेऽस्मिन् ब्रह्मचारीत्यादिवचनेन टिलोपः। तैतिलानां कद्रूः तैतिलकद्रूः। पण्यकम्बलः। अव
द्यपण्येति यदन्तत्वोदात्तः। पण्यः। कर्मधारयोयं संज्ञायामेवात्रायं स्वर इष्यते। अन्यत्र तु अन्तोदात्तत्वमेवाद्यु

५२ तीयाकृत्यास्वपि स्वरो न भवति। प्रतिपदोक्तकृत्यसमासस्य तत्र ग्रहणात्। दासीभारः। देवहूतिः। देवनीतिः। व
सुनीतिः। ओषधिः च द्रुमाः। दंसेष्टोत आचेतिष्टः। टित्वात् ङीप्। ऊढा तन्निवृत्तिः स्वरगणाद् दासी अन्तोदात्तादेकः पच
घञन्तः। ओषधिघञन्तत्वाद् आद्युदात्तः। ओषधी घृतेऽस्मान् इति कर्मण्युपधिकरणोश्चेति किः। स्थापितश्चीतिश्च द्रोरङ्गतः। दा
सीभारादिराकृतिगणः। बहुवचनादाद्यर्थाविगतिः। चतुर्थी तदर्थे। चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं स्यात्तदर्थे उ
त्तरपदे। यूपदारु। कुण्डलहिरण्यं। रथदारु। निकुषीत्यादिना क्थन् तोरथः। तदर्थे किं। गोमुखः। एवमपि कुबेरब
लिः। अत्र प्राप्नोति। अर्थे। अर्थे परेत्यादिर्भात्प्रकृतिविकारभावस्य न्याये स्वरो भवति। अर्थे। अर्थशब्दे उत्तरपदे च
तुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं स्यात्। मात्रेदं मात्रर्थं। देवतार्थं। अत्र तिष्यर्थं। अत्यन्ते जातीत्यादिनाश्च विशिष
ना। क्ते च। क्तान्ते उत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं स्यात्। गोहितं। गोरक्षितं। मनुष्यरक्षितं। मनुष्य
शब्दोन्तस्वरितः। कर्मधारयेऽनिष्ठा। कर्मधारये क्तान्ते उत्तरपदे अनिष्ठान्तं पूर्वपदं प्रकृतिस्वरं स्यात्। श्रेणिकृ रामः०
ताः। निधनकृताः। वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्। इति निप्रत्ययस्य नित्वादाद्युदात्तः। श्रेणिकृता
मुहिश्रोगृशो वा हुल फात्तपूर्वोपि गकुनिधनस्य हो नि धामः कृदिति मध्योदात्तः। कर्मधारये किं। श्रेणयः ५२
कृतं। श्रेणिकृता। अनिष्ठेति किं। कृताकृतं। ब्रूपादयः कृताद्भिरिभिः प्रतिपदोक्तः समासः स्यात्। सो

तेनेह न । वैदिकपंडितः । अहीने द्वितीया । अहीनवाचिनि क्तान्ते उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं स्यात् । क
ष्टश्रितः । त्रिशकलपतितः । ग्रामगतः । कष्टशब्दः क्तान्तोन्तोदात्तः । त्रिशकलशब्दो बहुव्रीहिराद्युदात्तः । ग्रामशब्दो ग्रसेरा
चेति मन्नन्त आद्युदात्तः । अहीने किं । कान्तारातीतः । द्वितीयानुपसर्गे इति वाच्यं । इहापि प्रतिषेधो यथा स्यात् । सु
खप्राप्तः । सुखापन्नः । थाथादिस्वरापवादो योगः । तृतीया कर्मणि । कर्मणि क्तान्ते उत्तरपदे तृतीयान्तं पूर्वपदं
प्रकृतिस्वरं स्यात् । अहिहतः । रुद्रहतः । नखभिन्नः । आङि श्रिहनिभ्यां ह्रस्वश्चेति अहिशब्द आद्युदात्तो म
ध्योदात्तः । रोदेर्णिलुक् चेति रक् तो रुद्रः । नखशब्दो नभ्रसुभ्यामित्यन्तोदात्तः । कर्मणि किं । रथेन यातो रथयातः । गत्य
र्थत्वात्कर्तरि क्तः । अयमपि थाथादिस्वरापवादः । गतिरनन्तरः । संस्रुहं धनमनुयमसमाहृतं । ननु समः पूर्वप
दादाद्युदात्तत्वे नन्तरग्रहणाद् द्वयोरप्युदात्तत्वं प्राप्नोति । नैतदस्ति । अन्तर्भवत्वे युगपदेनवैचांतस्य युगपत्त्वे अत्र युग
पदुच्चारणादेकस्मिन्पदे समासे वाक्ये द्वयोरुदात्तयोः समावेशाभावज्ञापनात् । न हि पर्यायस्तु । तन्नः । संस्रुहं धनं
इत्यत्र नित्यहणात्स्वरस्यावकाशत्वात्तस्मादनन्तरग्रहणाश्रमाहृतमित्यत्राद्युदात्त एव स्वरः शिष्यते । नन्वेवमपि
अनन्तरग्रहणाश्रमर्थं । समाहृतमित्यत्र परत्वाद्गतिरनन्तर इति समो निघाते कृते ऽन्तोदात्तस्वरितग्रहणा
नुवृत्त्या सर्वानुदात्तस्य प्रकृतिभावाभावात् आहृतमित्यस्य कृत्स्वरेण कदात्तत्वस्य हि अत्र तस्यैवादिस्वर

५२ दिस्वरप्रसंगात्। किंच गतिर्गतौ विसञ्ज्ञायाः दादावित्यविकारस्समाकृतमितियदायादादिर्भवतीत दासमेनिघातो
भावादनेन प्रकृतिस्वरः स्यादित्यनेन तद्ग्रहणं कर्त्तव्यमेव। घाघादिस्वरापवादोयोगो। कर्मणि किं प्रकृताः कटं देवद
त्तेः। ता दोच नितिकृत्यतौ। उपदेशे तकारादिस्तकर्वर्जितोयोनित्कृतप्रत्ययस्तदंते ऽनंतरपदेऽनंतरो गतिः प्रकृत्यास्या
त्। एवं विदत्राप्युत्तरसूत्रेपि द्रेयं प्रकृतो संप्रकृतौ श्रयं तद्रा प्रकृतिः। संप्रकृतिः। क्तिनयं। तादौ किं प्रजल्पाकः। घा
कनयं नितिकिं। प्रकृतौ तज्जयं। कृति किं। उपदेशे ता घर्षेड्ढाप्ययुथा स्यात्। प्रलविता। प्रलविता। प्रलवितुं। अतौ
किं। आगंतुः। सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्। कृत्स्वरापवादोयं योगः। ह्रस्वेचोद्रस्वमुहूर्त्तं। अयं
तु क्तिच्। न चेचान्तस्य युगपत्तात्। वे प्रत्ययांतस्यांतउदात्तः स्यात् नन्तरोगतिः प्रकृतिस्वरः स्यादेतदुःभयं युगपत्प्रसक्तात्
अन्वेतवे। ऽउपसर्गो सावमेत्यनुरात्र दात्तः कृत्स्वरापवादोयोगः। अनिगंतोचतोवप्रत्यये वप्रत्ययांते च तोपरे ऽनि
गंतो गतिः प्रकृतिस्वरः स्यात्। प्राङ्। प्राचो स्वरितो वानुत्ते इत्येकादेश उदात्तः। स्वरितो वा पदकं। अनिगंते किं। प्रत्यङ्
प्रत्यंचो। ननु यणादेशे कृते ऽनिगंतत्वात् प्रतीच इत्यत्र निषेधः स्यात् कथं। नच यणः पूर्वं स्वस्य प्रत्ययस्य स्वरे कर्त्त एम८
व्ये स्थानि द्वाववद्भूतिर्हरदत्तोक्तेन निर्वाहः शंक्यः। अयण्ड् इत्यत्रापूर्वविधित्वादोपप्रत्ययस्थ एवेतिचेन्न। इगंतस्य ५२
यणादेशे कृतेपि प्रतिषेध इति वचनेनैव निर्वाहः कर्त्तव्यः। चुस्वरं परत्वाद यं वाधते पराचः। नेन्वस्मिन् समासे

तेविभक्तौ अचइतिलोपे कृते सति शिष्टस्युस्वरं प्राप्नोति। एवं तर्हि चुस्वरादयं स्वरे कृते विभक्तौ अचइतिलो
पे कृते सति शिष्टस्युस्वरं प्राप्नोति। एवं तर्हि चुस्वरादयं स्वरो दृश्यते इति भाष्ये स्थितः॥ सधीचा॥ वप्रत्यये तं चतौ परे इडं
तावधि न्यधीशादेशे पूर्वपदप्रकृतिस्वरे स्यात्। तान्यञ्च उदात्तस्वरितयोरिति स्वरितः॥ न्यध ङ्अध्यञ्चौ नीचः॥ अर्थीचा॥ अ
त्रापि चुस्वरादयमेव दृश्यते। कृत्स्वरापवादो योगो॥ विष्वग्देवयोरिति सूत्रेण सहस्य सध्रिरिति सूत्रेण चवप्रत्यये तं चतौ प
रे सध्रिसध्री॥ अञ्चतौ दात्तवचनं कृत्स्वरविहमर्थमिति अत्रेदं अङ्मध्यङ् उदात्तस्वरितयोरिति स्वरितत्वं। अदद्रीचः॥ स
ध्रीच इत्यादौ तु चुस्वरेणापि सिद्धं॥ षष्ठ्याः पत्ये पदं प्रकृतिस्वरं वा स्यात्॥ ईषत्कडारः॥ इषत्स्वत्कृतः प्रातिपदिकस्व
रेणांतोदात्तः। एतत्समावे समासेतोदात्तः॥ अत्रेषदुग्रणावचनेनेति प्रातिपदोक्तसमासग्रहणान्नेह॥ ईषद्भेदः॥ अयं
स्वः। अत एव बहुव्रीहावयं विकल्पो न भवति। परत्वादत्र कृत्स्वरः॥ हिरण्यपरिमाणं धने॥ हिरण्यपरिमाणवा
चि पूर्वपदं प्रकृतिस्वरं वा स्यात् धनशब्दे उत्तरपदे। द्वयोः सुवर्णयोः समाहारो द्विसुवर्णं पात्रादित्वात् स्त्रीत्वाभावः। त
च्चतद्धनं च द्विसुवर्णधनं निष्कधनं पक्षे समासस्वरः॥ बहुव्रीहावप्ययं विकल्पो भवति परत्वात्॥ हिरण्ये पति किं प्र
स्थधनं परिमाणे किं॥ काञ्चनधनं॥ हिरण्यधनं॥ धने किं॥ निष्कमाला॥ प्रथमोऽचिरोपसंपत्तौ॥ प्रथमशब्दः पूर्वप
दं प्रकृतिस्वरं वा स्यादचिरोपसंपत्तौ गम्यायां॥ अचिरोपसंपत्तिः। अभिनवत्वमित्यर्थः॥ प्रथमवैयाकरणः॥ हे

५४ प्रतिव्याकरणं अध्येतुं प्रवृत्त इत्यर्थः। प्रथेरमच् इति चित्वात्प्रथमोन्तोदात्तः। वैयाकरणानामाद्यो मुख्यो वा यः प्रथम
वैयाकरणाः। एनित्यमन्तोदात्त एवा कतरकतमौ कर्मधारये। एतौ शब्दौ पूर्वपदभूतौ प्रकृतिस्वरौ वा स्यातां कर्मधारये
। कतरकठः कतमकालापः। पक्षेन्तोदात्तौ। कर्मधारयग्रहणमुत्तरार्थम्। इह तु कतरकतमौ जातिपरिप्रश्ने इति प्रतिपदो
क्तस्य ग्रहणात्सिद्धं। आर्यो ब्राह्मणकुमारयोः। ब्राह्मणकुमारयोः। ब्राह्मणकुमारयोरुत्तरपदयोः आर्यः पूर्वपदं प्रकृ
तिस्वरं वा स्यात् कर्मधारये। आर्यब्राह्मणः। आर्यकुमारः। आर्यशब्दो ण्यदन्तत्वात्स्वरितान्तः। आर्ये किं। परमब्राह्म
णः परमकुमारः। एतयोः किं। आर्यक्षत्रियः। कर्मधारये किं। आर्यस्य ब्राह्मणः आर्यब्राह्मणः। राजा च। ब्राह्मण
कुमारयोरुत्तरपदयो राजशब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात् कर्मधारये कनिन्नन्तत्वादाद्युदात्तो राजा। राजब्राह्मणः
राजकुमारः। पक्षेन्तोदात्तत्वं। राजशब्दो ब्राह्मणेनार्ये सति इति सामानाधिकरण्ये। षष्ठीसमासेन्तोदात्तत्वमेव।
योगविभागो यथासंख्यनिवृत्त्यर्थः। उत्तरार्थश्च। षष्ठी प्रत्येनसि। षष्ठ्यन्तो राजशब्दः पूर्वपदं प्रकृतिस्वरं वा
स्यात् प्रत्येनसि परे। राज्ञः प्रत्येनाः राजप्रत्येनाः। अलुकि षष्ठ्या आक्रोशे अन्यत्र लुक्। कर्मधारये तोदात्त एव। राम०
क्ते नित्यार्थे। क्तान्ते उत्तरपदे नित्यार्थे समासे पूर्वपदं प्रकृतिस्वरं वा स्यात्। आभीक्ष्ण्ये नित्यशब्दः। नित्यप्रहसितः ५४
संततप्रहसितः। अत्यन्तसंयोगे कालभावाध्वगन्तव्या इति कर्मणि द्वितीया। कालाश्च अत्यन्तसंयोगे चेति समासः।

त्यपूर्वे क्रे वेद इति त्यवंतो नित्यशब्दः आद्युदात्तः। संतत इति। यदा भावे क्तः तदा थाथादिस्वरेणांतोदात्तः। यदा कर्म
णि तदा गतिस्वरेणाद्युदात्तः। नित्यार्थे किं। मुहूर्त्तप्रहसितः। समासस्वरस्य द्वितीयापवं पूर्वपदप्रकृतिस्वरो बाधक
कः तस्य थाथादिस्वरस्यापि यापि दिको पवादो यं। ग्रामः शिल्पिनि। ग्रामशब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात्। शिल्पिवाचि
न्युत्तरपदे। ग्रामनापितः। ग्रामकुलालः। राजा च प्रशंसायां। राजशब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात् शिल्पिवाचिनि परे
प्रशंसायां। राजनापितः। राजकुलालः। कर्मधारये राजगुणाध्यारोपेणात्र पदार्थप्रशंसा। षष्ठीसमासे राजयो
ग्यतया तत्स्यात्। राजा किं। परमनापितः। प्रशंसायां किं। राजनापितः। शिल्पिनि किं। राजहस्ती। आदिरुदात्तः। आदि
रिति उदात्त इति चाधिक्रियते। अंताधिकारात् प्राग आदिरित्यधिकारः। प्रकृत्या भगालमित्यतः प्राग् उदात्ताधिका
रः। सप्तमीहारिणौ धर्म्येऽहरणे। सप्तम्यन्तं हारिवाचि च पूर्वपदमाद्युदात्तं स्यात् अहरणशब्दवर्जिते धर्म्यवाचिनि
परे। देयं यः स्वीकरोति स हारी। आवश्यके णिनिः। जनपदे ग्रामे कुले वा परंपरयाऽयातः स दायो धर्मः। तस्मा
दनपेतं तेऽजः प्राप्यं वा धर्म्यं। आचारेव शाद् अवश्यं कर्त्तव्यमित्यर्थः। स्तूपे शाणः। मुकुटे कार्षापणं। हृषदि माष
कः। संज्ञायामिति सप्तमीसमासः। कारनाम्नि चेति विभक्तेरलुक्। हारिणि। याज्ञिकाश्वः। वैयाकरणहस्ती। ष
ष्ठीसमासो। क्वचिदयमाचारो व्यवस्थितः। स्तूपादिषु शाणादि दातव्यं। याज्ञिकादीनामश्वादि दातव्यं। धर्म्ये

५५ ।स्नं वेरमः। कर्मकरवर्द्धितकः। मूले स्थूलः। अग्रे सूक्ष्मः। ओदनपिंडो वर्द्धितकः। स कर्मकराय दीयते। अन्यथा न कर्म
कुर्यात् न त्वसौ धर्मबोधकः। चित्स्वराद्धारिस्वरः। पितृव्यगवः। मातुलगवः। ननु अदूरत्रिंशाः लोहिताक्ष इत्यत्र द्वेडचूष
चापि आन्यचाद्द बहुव्रीहि पूर्वपदप्रकृतिस्वरो बाध्यते। तथा मातुलगव इत्यत्र चक्षित्वाद्धारिस्वरो बाध्येतेति कथं
चित्स्वराद्धारिस्वरः। सत्यं नायं विप्रतिषेधः किंतु इष्टिरियं चित्स्वराद्धारिस्वर इष्यते इति। अर्धहरणेकि। वाडव
हरणं। वडवाया अयं वाडवः। क्वचिदयमाचारः बीजनिषेकानंतरं वाडवाय शरीरपुष्ट्यर्थं योग्यमशनादि दा
तव्यं। यद्दीयते तद्धाडवहरणं। भिस्तुच्यते हरणशब्दः कर्मसाधनः। परोपि कृत्स्वरापवादोऽनो भावकर्मवचन इ
तिस्वरो बाध्यते इत्यनेन ज्ञाप्यते। तथा च कृत्स्वरोपि बाधनीय एवेति न वाडवहार्यः। अत्र हारिस्वरः सिध्यति युक्ते
चेयुक्तार्थे समासे पूर्वपदमाद्युदात्तं स्यात्। गोवल्लवः। अश्ववल्लवः। मणिरदातीति मणिरदः। एवमोदनादिः गो
धुक गोसंख्यः। युक्ते गोमणिरदः। गवादीनां पालक इत्यर्थः। कृत्स्वरान्तथाथादिस्वरान्त्च पूर्वविप्रतिषेधेनायं स्व रा म ०
र इष्यते गोदिवि इ गोधुक गोसंख्यः। युक्त इति तत्स्वरोपरमिधीयते। पुजस्समाधौ इत्यस्माद्रूपं। विभाषाध्यक्षे। अ ५५
ध्यक्षशब्दे परे पूर्वपदमाद्युदात्तं वा स्यात्। गवाध्यक्षः। अध्यक्षशब्दोपि युक्तवाच्येवेति प्राप्तविभाषेयं। पापं च शि
ल्पिनि। शिल्पिवाचिनि परे पापशब्दः पूर्वपदमाद्युदात्तं वा स्यात्। पापनापितः। पापकुलालः। पक्षेसमासान्तोदा

नत्वं। पापस्य ता पितः पापनापितः। तद्धन्यत्रायं समासो न भवति। पापाणके कुत्सितैरिति प्रतिपदोक्तस्य ग्रहणात्।
गोत्रांतेवासिमाणवब्राह्मणेषु क्षेपे। अपत्यप्रत्ययांतेः ते वासिनि च माणवब्राह्मणशब्दयोश्च परतः क्षेपवाचिनि
समासे पूर्वपदमाद्युदात्तं स्यात्। जंघावात्स्यः। यो जंघां ददात्यपह्नुमिति जंघावात्स्यः सन्तुः श्यं संपद्यते स जंघावा
त्स्य इति क्षिप्यते। सुश्रुतेति समासः। भार्यासौश्रुतः। सुश्रुतः अपत्यं भार्याप्रधानतया क्षेपः। वशाब्राह्मकृतेयः। व
शाभार्या वशाब्रह्मकृतश्च वृः श्रुभ्रादिः। उभयत्रापि शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। अंते वासि
। कुमारीदाक्षाः। केवलचासयणीयाः। घृतरौढीयाः। ओदनपाणिनीयाः। दाक्षिणावाशयशोनपाणिनिना रौढि
ना च प्रोक्तं शास्त्रमधीयते ते एषां शिष्या वा। चरणेन डादिः। कुमार्यादिलाभाय दाक्ष्यादिप्रोक्तं शास्त्रमधीयते
तच्छिष्यतां वा प्रतिपद्यते न तु भक्त्या। अतः क्षिप्यंते। भिक्षामाणवः। भिक्षां लप्स्येऽहमिति माणवो भवति। दासी
ब्राह्मणः। भयब्राह्मणः। भयब्राह्मणः। योऽब्राह्मणः स राजदंडादिभयेत ब्राह्मणा चोरं करोति स एवमुच्यते। माण
वब्राह्मणयोर्गोत्रेऽतेनप्रसिद्धभावात् ग्रहणं। गोत्रादिषु किं। दासीश्रोत्रियः। क्षेपे किं। महाब्राह्मणः। अंगानि मैरेये पू सम
। मैरेयपरे पूर्वपदमुत्तरपदे तदर्थाहि भक्ष्यवाचीनि पूर्वपदान्याद्युदात्तानि स्युः। गुडमैरेयः। मधुमैरेयः। पछीपमासी
। पुराणमिति रिक्तं मधुमैरेयः। गुडविकारस्यागुडांगं। अंगानि किं। परममैरेयः। मैरेये किं। फलासवः। भक्त्ता। ८

५६ स्यात्तदर्थेषु। अन्यवाचिपूर्वपदमाद्युदात्तं स्यात्तदर्थपरतरपदेषु। भिक्षाकंसः। भाजीकंसः। आशाकंसः। निष्का
द्योन्यविशेषाः। षष्ठीसमासाः। बहुवचनात्स्वरूपविधिनिरासे आरभ्यमाणे अस्य विशेषस्य भिक्षादेर्ग्रहणार्थमा
न्तरम्। किं। समाप्तशालयः। समशनं समाप्तश इति क्रियामात्रमुच्यते तेन द्रव्यं तदर्थेषु किं। भिक्षाप्रियः। आशाप्रियः
। बहुव्रीहिरयं पूर्वपदप्रकृतिस्वरेणान्तोदात्तः। गोविडालसिंहसैंधवेषूपमाने। उपमानार्थेषूत्तरपदेषु पूर्व
पदमाद्युदात्तं स्यात्। धान्यगवः। हिरण्यगवः। सामर्थ्याद्गवाच्छिस्य शोवाध्यते। भिक्षाविडालः। तृणसिंहः। सक्तुसैं
धवः। धान्यं गौरिवेति विग्रहः व्याघ्रादेराकृतिगणत्वादुपमितमितसमासः। उपमानार्थो यो यत्र यथासम्भव
ति स तत्र योजयितव्यः। उपमाने किं। परमसिंहः। गवादिषु किं। पुरुषव्याघ्रः। अके जीविकार्थे। जीविकार्थे
के समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्। दन्तलेखकः। अवस्करशोधकः। रमणीयका
कः। दन्तलेखनादिभिर्ये जीविकां ते एवमुच्यन्ते। अके किं। रमणीयकर्ता। जीविकार्थे किं। इक्षुभक्षि राम०
कापर्ययादिषु भावे एवुच् षष्ठीति समासः। कृत्स्वरापवादो योगः। सर्वत्र नित्यं क्रिडाजीविकयोरिति षष्ठी ५६
समासः। प्राचां क्रीडायाम्। प्राग्देशवर्त्तिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वपदमाद्युदात्तं स्यात्।

अजीविकार्थमिदं। उद्दालकपुष्पभंजिका वारणपुष्पप्रचायिका। शालभंजिका। संज्ञायामिति भावे ण्वु
ल्। प्राचां किं। जीवपुत्रप्रचायिका। उदीचां क्रीडेयं। नित्यं क्रीडेति समासः। क्रीडायां किं। तव पुष्पप्रचायिका। षष्ठी
ति समासः। पर्यायार्हणोत्पत्तिषु ण्वुच्। अणि नियुक्ते। अणन्ते उत्तरपदे नियुक्तवाचिनि समासे पूर्वपदमाद्युदात्तं
स्यात्। छत्त्रधारः। तूणीधारः। कमंडलुग्राहः। भुजिष्योगेऽस्य नियुक्त इति रूपं। नियुक्तः अधिकृतः। स च कस्मिं
श्चित्कर्त्तव्ये तत्परो न भवतीति युक्त इत्यनेन न सिध्यति। नियुक्ते किं। कांडलावः। शिल्पिनि चाकृञः। शिल्पिवा
चिसमासे अणन्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात् स चेदणकृञः परो न। तंतुवायः। शिल्पिनि किं। कांडलावः।
अकृञः किं। कुंभकारः। युक्ते चेत्यविवक्षितं सूत्रं प्रतिषेधार्थं वचनं। संज्ञायां च। अकृञः परो योऽण् तदन्ते ऽणन्ते परे पू
र्वपदमाद्युदात्तं स्यात् संज्ञायां। तंतुवायो नाम कीटः। वालवायो नाम पर्वतः। अकृञः किं। रथकारो नाम ब्राह्मणः।
गोतंतियवं पाले। गोतंतियवशब्दा आद्युदात्ताः स्युः पालशब्दे परे। गोपालः। तंतिपालः। यवपालः। तंतुविस्ता
रक्रिया। वत्सानां वेष्टनरज्जुस्तंतिः। अन्यत्र वशपालः। गोरक्षः। णिनि। णिनंते उत्तरपदे पूर्वपदमाद्युदात्तं
स्यात्। पुष्पहारी। अत्र संज्ञायामिति नानुवर्त्तते इति वृत्तिः इति सूत्रे भाष्ये कैयटोक्तेर्नेह नानुवृत्तिः। भोजी। अत्र पूर्वसूत्राए
वाऽनुवृत्तेर्भाष्योदाहरणादिह संज्ञाग्रहणमनुवर्त्तते इति प्रतीयते। तत्त्वं पाणिनिर्वेद। उपमानं शब्दार्थप्रकृता

५७ वृवाऽपमानवाचिपूर्वपदं शब्दार्थप्रकृतावेवणिनंतेपरेभ्राष्कदान्तं स्यात्। शुकइवक्रोशति ऽशुकक्रोशी। कर्तृ
र्युपमान इति णिनिः। ध्वांक्षराची स्वरतादी। ऽपमानं किं। भ्रस्य पूर्वस्य च योगस्य विषयविभागार्थः। शब्दार्थप्रकृ
तो किं। वृकवंची वृकप्रक्षी। प्रकृतिग्रहणं किं। प्रकृतिरेव यत्रोपसर्गैर्भिरपेक्षा शब्दायीत तत्र यथा स्यात् इह मा भू
त्। गर्दभोच्चारी। कोकिलाभिव्याहारी। एवं किं। शब्दार्थप्रकृतो ऽपमान एवेत्येवं नियमो मा भूत्। तथा सति साधुधा
यी अत्र पूर्वेण ष्कदान्तता न स्यात्। वृकवंचीत्यत्र च स्यात्। युक्तारोह्यादयश्च। युक्तारोह्यादयः समासा भ्राष्कदान्ताः
स्युः। युक्तारोही। आगतरोही। आगतयोधी। आगतवंची। आगतनंदी। आगतप्रहारी। एषु णिनीत्यव सिद्धे युक्तादीनि
आरोह्यादिष्वेव आरोह्यादिषु युक्तादीन्येवेति नियमार्थमिदं। तेनेह न। वृक्षारोही। युक्ताध्यायी आगत
मत्स्यः। कृष्मधायीष्टं क्षीरहोता। भगिनीभर्ता। याजकादित्वात् षष्ठीसमासो। ग्रामगोधुक्। अश्वत्रिरात्रः। व्युष्टि
त्रिरात्रः। गार्ग्यारद्यः षष्ठीसमासा एते। एकशितिपात्। एकः शितिः पादो ऽस्येति त्रिपदे बहुव्रीहौ द्विगुतात्पर्येति तत्पु
रुषः। न तु अधिका पाष्ठिवृषीरापस्य सो धिकषष्ठिवर्षः। अत्र त्रिपदे बहुव्रीहौ द्वयोस्तत्पुरुषे कृते समासांतो राम०
दान्तत्वे वाक्षित्वाद्विगोः ते स्वदिगाविशिपूर्वपदप्रकृतिस्वरे राष्कदान्तत्वमधिक ग्रोहस्य भवति केनेत न्वान्तस्य। ५७

सर्वैकशितिपाच्छब्देपि भविष्यति किमर्थमयमत्र पठ्यते इति चेत् न । उत्तरपदे शिसंतस्य द्विगुस्वरेण भवती
ति ज्ञापनार्थत्वात् । तेन द्विशितिपात् अत्र शितिशब्द आद्युदात्तः । पात्रेसमितादयो युक्तारोह्यादयः । ततस्तेषां घृतादीनां भव
ति । अधिकं शतं वर्षाणि यस्य इति त्रिपदे बहुव्रीहौ कृते तद्धितार्थोत्तरपदेति तुल्यवत्सति सति शिखात्वाश्मामांतोदा
त्तत्वेन मध्योदात्तत्वं प्राप्नोति । आघृतादित्वे भविष्यति तत् दर्शयुक्तारोह्यादि अधिकशतवर्षशब्दः पठनीय इति सम
र्थसूत्रे भाष्ये दीर्घकाशतुषभ्राष्ट्रवटं जे । दीर्घादीनि च पदान्याद्युदात्तानि स्युर्जे उत्तरपदे । कुटीजः श
मीजः । काशजः । तुषजः । भ्राष्ट्रजः । वटजः । दीर्घादि किं । वुद्धिजं । जे किं । शमीवृक्षः । अंत्यात्पूर्वं बह्वचः । जे उत्तरप
दे बह्वचः पूर्वपदस्यांत्यात्पूर्वमुदात्तं स्यात् । स्त्रीजं वधूजं गवां गर्भाधाना यमथमसमुपसरणामुपसरः । प्र
जने सर्तेरित्यप् । तत्र जातः उपसरजः । आमलकीज इत्यत्र दीर्घकाशेति बाधित्वा परत्वादयं स्वरः । ग्रामेनिव
संतः । ग्रामशब्दे उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्समासश्चेन्निवासस्यानवाचीनं भवति । सूत्रे निवसंतीति यस्मिन्नि
ति तन्मवहि वसिभासिसाधिगाडिमंडिजिनंदिभ्यश्चेति मत्वा मल्लग्रामः । महाग्रामः । अत्र ग्रामशब्दः समूहवा
ची । देवग्रामः । हास्तिग्रामः । तत्स्वामिको ग्राम इत्यर्थः । अनिवसंतः किं । दाक्षिग्रामः । दाक्षयो निवसंति यस्मिन्ना
ग्रामः एवमुच्यते घोषादिषु च । घोषादिषूत्तरपदेषु पूर्वपदमाद्युदात्तं स्यात् । दाक्षिघोषः । घोषः कटः पल्वलः । ह्र

५८ दावदृशी। पिंगला। मालारस्ता। त्र्यश्वा। तरशा। शाल्मली। मुनिकूटा। अत्रापि वसंत इति केचिदनुवर्त्तयंति। अपरे ना
नुवर्त्तयंति। छात्र्यादयः शालायां। छात्रिशाला। हृषीके छात्र्यादयेश्चाद्युदात्ताः स्युः। छात्रिशाला। छात्रिशालि। मांडि
व्याडि। आपिशलि। आखंडि। गोमि। पिप्पदा। शालान्तो नपुंसकी भवति तदा तु लेखशालायां नपुंसके कृत्यस्मात् पूर्वविप्र
प्रतिषेधेनाद्यस्वरो भवति। छात्रिशालं। इति काशिका। प्रस्थे नेन्त हृश्यते प्रस्थेवृद्धमकर्क्यादीनां। प्रस्थे परे कर्क्यादिव
र्जितं अवृद्धं पूर्वपदमाद्युदात्तं स्यात्। इंद्रप्रस्थः। अवृद्धं किं। दाक्षिप्रस्थः। अकर्क्यादीनां किं। कर्किप्रस्थः। प्रस्थदाहर
णांतोदात्तत्वं। कर्की। मघी। मकरी। कर्कंधू। शमी। करीर। कटुक। कवल। बदर। मालादीनां च। प्रस्थे परे मालादीनामादिरुदा
त्तः स्यात्। मालाप्रस्थः। माला। शाला। शोणा। द्राक्षा। ध्रौक्षा। क्षामा। काञ्ची। एक। काम। वृद्धमूर्थ्यमारंभः। एकशा
लापरे उ प्राचां देशे इति वृत्तौ हेतु। अमहन्नवं नगरे ऽनुदीचां। नगरशब्दे उत्तरपदे महन्नववर्जितं बववर्जितं
च पूर्वपदमाद्युदात्तं स्यात् स चेन्नगरमुदीचां न। ब्रह्मनगरं। त्रिगर्त्तनगरं। अमहन्नवं किं। महानगरं। नवनगरं। अनु
दीचां किं। कांतीनगरं। अर्मे चावर्णं द्व्यच्त्र्यच्। अर्मशब्दे उत्तरपदे महन्नववर्जितं पूर्वपदं अकारान्तं द्व्यचं त्र्यचं चाद्युदा रा म०
त्तं स्यात्। दत्तार्मं। गुप्तार्मं। कुक्कुटार्मं। अवर्णं किं। बृहदर्मं। द्व्यच्त्र्यच् किं। कपिंजलार्मं। अमहन्नवं किं। महार्मं। अर्मे परे भू ५८
तादीनि पूर्वपदान्याद्युदात्तानि स्युः। भूतार्मं। अधिकार्मं। संजीवार्मं। मद्राश्मार्मं। कज्जलार्मं। मद्राश्मग्रहणं

संघातविगृहीतार्थ्यं। भूद्रार्मे। अग्न्यार्ममिति काशिकातन्त्रेतिह रदन्तः। अश्मनो ऽकारान्तत्वाभावात् पूर्वेणाप्रा
प्तेर्माध्य ऽन्ते त्यर्थ्यां अश्मनो ऽश्माय इति ऽचिमद्राश्मस्यावर्णान्तत्वं। दिवोदासादीनां छन्दस्याद्युदात्तत्वं वा चो दिवोदास
यदाश्मघ्नो दिवोदासवध्यस्याश्मलु कृद्यन्तः। अन्त्यः षट्पदादिरित्यतः प्रागन्त इत्यधिक्रियते। सर्वं गुणकार्त्स्न्ये। गुणकार्त्स्न्ये
वर्तमानः सर्वशब्दः पूर्वपदमन्तोदात्तं स्यात्। सर्वश्वेतः। सर्वकृष्णः। सर्वमहान्। गुणतादिगुणेन सर्वावयवानां व्याप्ति
ः। सर्वं किं। परमश्वेतः। आश्रयव्याप्त्या परमत्वं विवक्षितं न तु कुलत्वेन गुणेति किं। सर्वसौवर्णः। विकारविषयं का
र्त्स्न्यं कार्त्स्न्ये किं। सर्वेषां श्वेतः सर्वश्वेतः। गुणात्तरेण समासस्य लोपश्च वाच्य इति वचनात् षष्ठीसमासः। अत्र
सर्वशब्दो गुणकार्त्स्न्ये ऽस्ति। संज्ञायां गिरिनिकाययोः। संज्ञायां विषये गिरिनिकाययोः परयोः पूर्वपदमन्तोदात्तं
स्यात्। अञ्जनागिरिः। वनगिर्योरिति दीर्घः। मौञ्जिनिकायः। संज्ञायां किं। परमगिरिः। विप्रनिकायः। गिरिनिकाययोः
किं। शरवर्णा। दूर्वावर्णा। कुमार्यां वयसि। कुमारीशब्दे परे पूर्वपदमन्तोदात्तं स्याद् वयसि द्योत्ये। वृद्धकुमारी। जरत्कुमा
री। यद्यपि कुमारीशब्दः प्रथमे वयसि वर्तते अत एव ङीप् क्रियते तथापि पुंसा सहासंप्रयोगमात्रमुपादाय प्रयुक्तो वृद्धादि
भिः समानाधिकरण एवात्र गृह्यते। अन्यथा वयसीति व्यर्थं स्यात्। वयसीति किं। परमकुमारी। उदके ऽकेवले। अकेव
लमिश्रं तद्वाचिनि समासे उदकशब्दे उत्तरपदे पूर्वपदमन्तोदात्तं स्यात्। गुडमिश्रमुदकं गुडोदकं। तिलोदकं। एकादशः

५५
स्वरितो वानुदात्ते इति पक्षे स्वरितः। अकेवले किं। शीतोदकं। द्विगौ क्रतौ। क्रतुवाचिनि समासे द्विगावुत्तरपदे पूर्वप-
दमन्तोदात्तं स्यात्। तिसृणां रात्रीणां समाहारस्त्रिरात्रं। गर्गाणां त्रिरात्रं गर्गत्रिरात्रं। द्विगौ किं। ज्योतिष्टोमः। क्रतौ किं।
मस्त्रिरात्रं। बिल्वा हूयन्तेस्य बिल्वहोमस्य वा समस्तरात्रं बिल्वसमरात्रं। सभायां नपुंसके। क्लीबे समासे सभाशब्दे परे पू-
र्वपदमन्तोदात्तं स्यात्। दूनसभं गोपालसभं। सभायां किं। ब्राह्मणसेनं। नपुंसके किं। राजसभा। सभा। सभाराजेत्यादि प्रति-
प्रतिपदोक्तनपुंसकत्वग्रहणादिह रमणीयसभं विप्रकुलं बहुव्रीहौ न भवति। पुरे प्राचां। पुरशब्दे परे प्राचां देशे पू-
र्वपदमन्तोदात्तं स्यात्। शिवदत्तपुरं। कांचीपुरं। प्राचां किं। शिवपुरं। पुरशब्दोऽकारान्तोऽस्ति। न कृप इत्यप्रत्ययान्तोऽप्य-
स्ति। डमयोर्ग्रहणामविशेषात्। अरिष्टगौडपूर्वे च। अरिष्टगौडपूर्वके समासे पुरशब्द उत्तरपदे पूर्वपदमन्तोदा-
त्तं स्यात्। अरिष्टपुरं। गौडपुरं। पूर्वग्रहणादिहापि। अरिष्टाश्रितपुरं। गौडभृत्यपुरं। न हास्तिनफलकमार्दे-
याः। मृदोरपत्यं शुभ्रादित्वात् ढक्। ढे लोप इत्युलोपः। कुसूलकूपकुम्भशालं बिले। बिलशब्द उत्तरपदे कुसूलादी-
नि पूर्वपदान्यन्तोदात्तानि स्युः। कुसूलबिलं। कूपबिलं। कुम्भबिलं। शालाबिलं। कुसूलादीनि किं। सर्पबिलं। बिले किं।
कुसूलस्वामी। दिक्शब्दा ग्रामजनपदाख्यानचानराटेषु। दिक्शब्दाः पूर्वपदान्यन्तोदात्तानि स्युः ग्रामादिषूत्तरप- रा.म.०
देषु चानराटे स्वरूपग्रहणं। अन्यत्र तदर्थग्रहणं। पूर्वेषुकामशमी। अपरकृष्णमृत्तिकादि कर्म एवं संज्ञायामिति ५८

समासः। जनपदः। पूर्वपंचालाः। अपरपंचालाः। पूर्वापरेति विशेषणसमासः। आख्यानात्पूर्वयायां तायया तिम
धिकृतो ग्रन्थ इत्यशीपा यायातः। पूर्वेवानेशटं। अपरचानसटं दिशि दृष्टो दिकुशट्ः। तेन संप्रति कालवाचिनेपि भव
तीति पूर्वयायातं इत्युदाहरणं। आचार्योपसर्जनश्चांतेवासिनि। आचार्योपसर्जनांतेवासिन्युत्तरपदे दिक्
शब्दात्स्तोदात्तः स्युः। पूर्वपाणिनीयाः। अपरकाशकृत्स्नाः। इत्जश्चेत्ययसर आचार्योपसर्जनः किं। पूर्वछाप्याः।
अंतेवासिनि किं। पूर्वपाणिनीयं शास्त्रं। सत्रेश्च समस्यते प्रथमा। उत्तरपदवृद्धौ सर्वं च। उत्तरपदाधिकारविहि
तवृद्धिमत्युत्तरपदे सर्वशब्दात् दिक्शब्दाच्चान्तोदात्ताः स्युः। सर्वपांचालकः। अपरपांचालकः। सुसर्वार्धदिक्
शब्देभ्यो जनपदस्येति तदंतविधौ अनुवृत्तादपि बहुवचने तिवुञ्प्रत्ययः। सुसर्वार्धाज्जनपदस्य दिशोमद
द्राणामित्युत्तरपदवृद्धिः। वृद्धिमात्रस्योत्तरपदत्वाभावात्स्यामेष्व्यात वृद्धिमदुत्तरपदस्य हि सिद्धेउत्तरपद
ग्रहणं तदधिकारविहितवृद्धिपरिग्रहार्थं इति केयटादयः। उत्तरपदशब्दस्य गितत्वादधिकारप्रतिपत्तिरित्य
न्यो ते नेह न सर्वभासः। सर्वकारकः। अपरकारकः। अपरभासः। उत्तरपदादिरित्यविमं थ्युः हुतास समथ्यपीया
य्यकाउ दृशोदृशो कस्मादित्युत्तरपदान्ताधिकृतात्तानि स्युः। द्वाभ्यां कंसाभ्यां क्रीतः द्विकंसः। द्विमथः। द्विमपः। द्विपा
ब्यः कस्माद्दिठन्। आर्हादगोपुच्छेति ठक्। अध्यर्धाद्ठञ्ज्ञ्या प्राप्यस्य परिमाणात्वात्यांगतो ष्वेजात्राध्येर्वेति लुक्

८०

द्विकांडे प्रमाणमस्य द्विकांडं । प्रमाणे लो द्विगोर्नित्यमिति मात्रचो लुक् । कंसाटीनि किं । पंचपली । द्विगोष्ठंश्च । द्वयोः
कंसाद्दिकं साद्दिकंसः । तत्पुरुषे शालायां नपुंसके शालोत्तरपदे क्लीबे तत्पुरुषे उत्तरपदे माद्युदात्तं स्यात् । ब्राह्मण
शालं । छाया आद्ययशालायामित्यतः परत्वादयं स्वरः । छात्रिशालं । विभाषा सेनासुरेति प्राप्ते पदोक्तस्य नपुंसक
त्वस्य ग्रहणात् तत्पुरुषे शाले अत्र वहुव्रीहौ न भविष्यतीति तत्पुरुषस्य ग्रहणमुत्तरार्थं शालायां किं । ब्राह्मणसेनानपुं
सके किं । ब्राह्मणशाला । कंथा च । तत्पुरुषे क्लीबे कंथाशब्दे उत्तरपदे माद्युदात्तं स्यात् । शोभनः शमोस्यापत्ये
सकंथं सौशमिकंथं । संज्ञायां कंथेति क्लीवत्वान्नपुंसके किं । दाक्षिकंथा । आदिश्चिहणादीनां । कंथोत्तरपदे त
त्पुरुषे क्लीवे चिहणादीनां पूर्वपदानामादिरुदात्तः स्यात् । चिहणकंथं । चिहणं । चिनोतेः क्विप् चित् । हंतेः प
चा घच् निपातनान्न लोपो णत्वं च । मडरं मडुरं मलमल्लवधावशो । आभ्यां मरप्रत्ययः । निपातनाल्लत्वं स्युडाव
। विगततुलस्येदं वैतुलं । पटदिति कायतिपटत्कः । कैशकेश्यान्तोनुपसर्गकः । पिडमादत्ते विडालः । लात्र्यादा
नेसोपसर्गे इत्यस्मादेव निपातनात्कः । तस्यापत्यं वैडालिः । तस्य वकर्णौ वस्य वोडालिकर्णः । वैडालिक
र्णी इति निपातनात् । कुकु इति शब्दं करोति कुक्कुटः निपातनाद्दलोपः । चिनोतेः क्विप् । कर्णतरवनिपातनात्तत्स्यकुः । चि
कणाः पूर्वपदस्याद्युदात्तमत्वार्थं पुनराद्दिग्रहणं । चेलखेटकटुककांडं गर्हायां । चेलादुत्तरपदानि तत्पुरुषेनिंदार

राम० ८०

यामाघदान्तानि स्युः। पुत्रश्चेलमिव तुच्छ इत्यर्थः। पुत्रचेलं। रयेटमिति तरशां। तद् पूर्वं लाडुपानत्। ऊपानरखं। राकटुक
मस्वादुः। उदश्वित् कटुकं। मत्तकांडा। कांडं शूरः। पथात त्वं त्वं पीडाकरं एवं मतमपीत्यर्थः। गर्हायां किं। परमचेलं। चीरमुपमा
नेऽउपमाने वा चीरशब्दे उत्तरपदे माघदान्ते स्यात् तत्पुरुषे। वस्त्रं चीरमिव वस्त्रचीरं। परचीरं उपमाने किं। परललस्य पशाकं। मि
श्रे। पललादीन्युत्तरपदान्यामाघदान्तानि स्युः मिश्रे तत्पुरुषे। गुडमिश्रं पललं। गुडपललं। घृतपललं। मुद्गपशाकं। मद्योरा
मिश्रीकरणमिति समासः। मिश्रे किं। परमपललं। कूलसूदस्थलकर्षाः संज्ञायां। तत्पुरुषे कूलादीन्युत्तरपदान्याघदा
न्तानि स्युः संज्ञायां। दाक्षिकूलं। देवसूदं। नाडायनस्थाली। लिंगविशिष्टपरिभाषया स्थलीग्रहणं। ज्ञानपदेति
डीषु। दाक्षिकर्षः। ग्रामनामधेयान्येतानि संज्ञायां किं। परमकूलं। अकर्मधारये राज्यं। अकर्मधारये तत्पुरुषे
राज्यमुत्तरपदमाघदान्तं स्यात्। ब्राह्मणराज्यं। कर्मधारये तु परमराज्यं। चेलराज्यादिस्वरादव्ययपूर्वपदप्रकृति
स्वरो भवति पूर्वविप्रतिषेधेन। कुचेलं। कुराज्यं। वर्ग्यादयश्च। वर्ग्यादीन्युत्तरपदान्याघदान्तानि स्युः कर्मधारये तत्पुरु
षे। वासुदेववर्ग्यः। अकर्मधारये किं। परमवर्ग्यः। दिगादिषु वर्ग्यादयः पठ्यन्ते। त एव यत्प्रत्ययान्ता इह वर्ग्यादयो गृ
ह्यन्ते। वर्ग्यादिपाठाभावात्। पुत्रः पुंभ्यः। पुमर्थशब्देभ्य उत्तरपदं पुत्रशब्द माघदान्तः स्यात् तत्पुरुषे। कुनटस्यापत्यं कौ
नटिः। तस्य पुत्रः कौनटिपुत्रः। दासकपुत्रः संज्ञायां कन्। पुत्रः किं। कौनटमातुलः। पुंभ्यः किं। दासीपुत्रः। नाचार्य

६१ राजर्त्विकसंयुक्तज्ञात्याख्येभ्यः । आचार्य उपाध्यायः । राजा ईश्वरः । ऋत्विक् याजकः । संयुक्ताः स्त्रीः स्त्रैः संबंधिनः श्या
लादयः ज्ञातयो मातृपितृसंबंधिनो बांधवाः । एतदाख्येभ्यः पुत्रशब्दो नाद्युदात्तः स्यात् । आख्याग्रहणात् स्वरूपपर्या
यपर्यायाणां विशेषाणां च ग्रहणार्थं । आचार्यपुत्रः उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । नंदपुत्रः ऋत्विक्पु
त्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्तपुत्रः । संबंधिपुत्रः । श्यालकपुत्रः । ज्ञातिपुत्रः । बांधवपुत्रः । भ्रातुष्पुत्रः । कृतो
विधायो निहतिषष्ठ्या अलुक् । पुत्रस्वरे प्रतिषिद्धे समासस्वरेणांतोदात्तत्वं । चूर्णादीन्यप्राणिषष्ठ्याः । अप्राणिभ्यः पर
या षष्ठी तदंतादुत्तरपदानि चूर्णादीन्याद्युदात्तानि स्युः । मुद्गचूर्णं । अप्राणिषष्ठ्याः किं । मत्स्यचूर्णं । चूर्ण संकोचे पचाद्यच्
कहिंसां घातियातिचकेरिवः । करिपः । महेरिनणवहुलवचनात् छकेरपि । शाकिनं । शकादिभ्योऽटन् । अतेर्हुरतेति शकटाद
ण । शाकटं । द्राक् क्षरतीति द्राक्षा पृषोदरादिः । तुसशब्दे तितो बहुलवचनात्तः । निपातनाद्दीर्घत्वं । तूस्तं कुशितं दु
नोति किप् अस्मादेव निपातनात् नुगभावः पूर्वपदस्य नुम्श्च । कुंदुं मिमीते कुंदुमः । दलेः कपन् । दलपः । चमेरसच्
चमसः । ततो जातिलक्षणो ङीष् । चमसी । कनी दीप्तिकांतिगतिषु । पचाद्यच् निपातनाद्द्वित्वं । चक्क कनाः
: चक्कनः । पक्षे एत्वं कद्वित्वं च निपात्यते । चौलस्यापत्यं चौलः । घञन्तणधेत्योश षट् च कांडादीनि । अप्राणिषष्ठ्याः राम॰
षष्ठ्याः षट्कांडादीन्याद्युदात्तानि । निष्कः कांडं गर्हायामिति सूक्तं गर्हायामपि भवति । दर्भकांडं । शरकांडं । चीरमुप ६१

मानमित्युक्तं। अनुपमानेपि भवति। दर्भचीरं कुशचीरं। पललसूपशाकं मिश्रे इत्युक्तं। अमिश्रेपि भवति। ति-
लपललं। मुद्गसूपः। मूलकशाकं। कूलं संज्ञायामित्युक्तं। असंज्ञायामपि भवति। नदीकूलं। बहूकिं। राजस-
दः। अप्राणिषष्ठ्याः किं। देवदत्तकांडं। कुंडं वने। वनपर्यायः। कुंडशब्दः उत्तरपदं तत्पुरुषे आद्युदात्तं स्यात्। वनशब्दस्था-
नेकार्थत्वेपि समुदायार्थसंग्रहणार्थं। दर्भकुंडं। दर्भसमुदाय इत्यर्थः। वने किं। मृत्कुंडं। मृद्भाजनविशेष इत्य-
र्थः। प्रकृत्या भगालं। तत्पुरुषे भगालवाचिन्युत्तरपदे प्रकृतिस्वरं स्यात्। कुंभीभगालं। कुंभीकपालं। लक्षणावंते इति
मध्योदात्ते उत्तरपदे। गतिकारकोपपदात् कृत्। गतेः प्रकारकः। कारकात्। इध्मप्रव्रश्चनः। पलाशशातनः। क-
रणोत्युदकमेव स्यात्। समासः। उपपदात्। ईषत्करः। अयं खलुः। उच्चैःकारं। गतिकारकोपपदात् किं। देवदत्तका-
रकः। संबंधसामान्ये षष्ठीसमासः। अत एव तृजकाभ्यां कर्त्तरि इति समासनिषेधो नास्ति। गतिकारकोपपदैः कि-
यावाचि पदमाक्षिप्यते इति कृद्ग्रहणं भाष्ये प्रत्याख्यातं। प्रशब्दस्य पचतितरांशब्देन समासे कृते उत्तरपदप्र-
कृतिस्वरो भवत्येव। एवं प्रपचतिरूपं। प्रपचतिकल्पं। प्रपचतिदेश्यं। केचित्तु प्रशब्दस्य पचतितरशब्देन समासे
तते आमि सति चित्स्वरो भविष्यतीत्याहुरिति काशिका। एवं च सति प्रपचतितरशब्दस्य लिङ्गत्वाभावा-
त् आमभावः एकदेशादामि कृते तदंतस्य कपदत्वाभावादाम् प्रपचतितरां देवदत्तेत्यत्रामः एकांतरमामंत्रितमनं

६२

तिके इति निषेधो न स्यात् तस्माद्दामंते नैव समासः कार्य इति हरदत्तः ।तिङ्न्तसमासेऽव्ययस्वरः प्रवर्तते । तत्र यथा हि ।योजा
ते एवं मंत्रे पर्यभूषत । यः शंवरमिति मंत्रे अन्वविंदत् यच्छब्दयोगात् तिङन्तस्य गतिसमासः पूर्वपदाव्ययप्रकृ
तिस्वरं बाधित्वोत्तरपदप्रकृतिस्वरो गाड्स्वरः शिष्यते । अत्यायाहि शाश्वत इति मंत्रे यच्छब्दयोगाभावात् तिङन्त
स्य याहिपदयोः सुबिति योगविभागं विभागे न समासः गतिप्रयुक्तसमासाभावादव्ययस्वरेण भवति ।
उत्तरपदस्योदात्तस्य स्यत्वाच्चात्राव्ययपूर्वपदप्रकृतिस्वरे गाड्स्वरः ।न तो गतिमनेतित्रपितिशब्दे नसमा
सश्चेन्नोत्तरपदप्रकृतिस्वरो गाड्स्वरः शिष्यते । यत्रानशेदेवयंतो युगानि वितन्वते अत्र अवितन्वते शब्दस
त्रिचक्रादित्वादंतोदात्तत्वे बोध्यं । उभे वनस्पत्यादिषु युगपत् । वनस्पत्यादिषु पूर्वोत्तरपदे युगपत्प्रकृतिस्व
रे स्यातां । वनस्पतिवनशब्दोऽनविषयत्वादाद्युदात्तः । पाते डुतिप्रत्ययस्वरेण पतिशब्दोऽपि पारस्करादित्वा
त्सुट् । बृहस्पतिः । बृहच्छब्दोऽतिप्रत्ययांतत्वादंतोदात्तोऽप्याद्युदात्तो निपात्यते । तनूहतोरिति वचनाच्छुटत
त्लोपो । शचीपतिः । शचीशब्दः शार्ङ्गरवादित्वात् ङीनि ङीन्नाद्युदात्तः । शचीभिर्नेइति दर्शनात् । एते षष्ठीसमासाः
। तनूनपात् नप्त्रादान् नपादिति सूत्रेण पाकृद्धाद्युदात्तो निपात्यते । इष्यते च । नपातं च विक्रमेणांच । तनूनन   रा.म.०
पादिति विग्रहः । नराशंसः । नराएनं शंसंतीत्यर्थः । नृ नयेः ऋदोरप् पूर्वं सतेः कर्मणि घञ् इत्याद्युदात्तोऽत्र अन्ते   ६२

षामपीति दीर्घः। शुनःशेपः। शुनइव शेपोऽस्येति बहुव्रीहिः। शेपपुच्छलांगुलेषु शुनः संज्ञायामित्यलुक्। शुना
:शुन इति प्रातिपदिकस्वरेण शेप इति स्वांगस्वरेणाद्युदात्तौ। शंडामर्कौ। शंडि रूतायाप चाघ चा। ग्रामादित्वादा
द्युदात्तः। मर्च पतेरण्। भीके तिकन्यायदुद्वावपि वृजूतत्वादाद्युदात्तौ। तयोर्द्वंद्वेऽन्येषामपीति दीर्घत्वं। स्त्रावरुत्रीअव
सेः कृः। निधाच घ्वजनादित्याद्युदात्तः। ग्रतिनि स्क भिते मिस त्रे वरूत्रीशब्दश्चाद्युदात्तो निपात्यते। वरूत्रीभिः सुशरणा
इति दर्शनात्। तयोर्द्वंद्वे दीर्घत्वं पूर्ववत्। वावि श्ववयसौ। विश्ववसं सनेप चाघ चा। अस्मादेव निपातना
द्रलस्य वः। विश्वानि वयांसि यस्येति बहुव्रीहौ विश्वं संज्ञायामंतोदात्त एवेति दीर्घः। मर्मत्क्राः। मत्कोचिर्चूमुजिमडभ्यो
उक्रल्यु कौ। द्वावप्यंतोदात्तौ। द्वंद्वे द्वानां अदेवतात्वं द्वार्थः। पाठः ब्रनुदात्तादीनामाद्युदात्तार्थः पाठः। अतः अंतति
त्यधिक्रियते। तेनोत्तरत्रोत्तरपदस्यांतोदात्तत्वं नञ्सुभ्यामित्यत्र तु कपि वर्पमिति स्वाप का स्य मास्या तोदात्तत्वं। था
थघञ्क्ताजवित्रकाणां। थाथघुनीथः। अवभथः। हनि कुषिनीरमि काशिभ्यः क्थन्। अवभृज इति क्थन्। हृस्व
रेण घञन्तत्वे प्राप्ते। प्रवभुत्तरे घञ्। उदाहरणं ऊ अश्व। आवसथः। उपवसथः। प्रत्ययस्वरेण मध्योदात्तत्वं ह्रस्वत्वेन
प्राप्ते घञ्। प्रभेदः। काष्ठभेदः। क्त। दूरादागतः। विमुक्तः। कृतेरितः। आतपेन शुष्कः। आतपशुष्कयदातः आतपशुष्कः।

।आतपशुष्कः। तदा समसमीति सिद्धं शुष्के ति पूर्वपदप्रकृतिस्वरः। अच्। प्रक्षयः। उपक्षयः। प्रजयः। श्रयो निवासे जय
६३ यः करणम् इत्याघञः दान्तो। अपः। प्रप्लवः। निम्नपदस्य त्रायस्वरो न इष्यते किंतु कृत्स्वर एवेति। गदहृद्ध इति सूत्रे भ्याश्च। का
हल्लवः। इत्र। प्रलवित्रं। आर्त्तिलूधूसूखन इति इत्रः। काहल्लवित्रं। प्रवृषः। प्रदृषः। खाः। त्वगोवृषः। गावृषः। हिगुपधादि
ति कः। गोवृषः। खार्यो। वृषः। गाः। वर्षति खाशी। वर्षति मलविभजादित्वात्कः। वृषादीनां चेत्याघञ् दान्तत्वात् गतिका
रकोपपदात् किं। सुस्कृतं अतिस्कृतं भवता। सुप्रजायां अतिरतिक्रमणे चेति कर्मप्रवचनीयः। अव्ययपूर्वपदप्रकृ
तिस्वर एवात्र। कृष्णस्वयं पद्यं तेते कृत्य पद्याः। अत्रोप्यये स्वर इष्यते स्तूपमानो। क्तः। सुश्रद्धादुपमानाच्च परे क्तान्तं अ
न्तोदात्तं स्यात्तत्पुरुषे। सुस्तुतं सुपीतं सुभक्तं। गतिरनन्तर इति प्राप्ते। हृक्केशवालुं मह्टकावलुं मसि हे नेवविर्द्दि
तं। सिंहविमर्दितं। तृतीया कर्मणीति प्राप्ते। गतिकारकोपपदात्कृदित्यस्य वा। सुस्तुतं भवता। संज्ञायामनाचितादीना
गतिकारकोपपदात्परं क्तान्तं संज्ञायामन्तोदात्तं स्यात्तत्पुरुषे आचितादीन् वर्जयित्वा। संस्कृतं रामायणं। उप
हूतः शाकल्यः। परिजग्धः कौण्डिन्यः। एषु गतिरनन्तर इति प्राप्ते। भवतेः प्राप्स्यतीति कर्मणि क्तः। संभूता दयो रामाय
णादीनां संज्ञाः। धनुः खाता नदी। कुद्दालखातं नगरं। हस्तिमृदिता भूमिः। एषु तृतीया कर्मणीति प्राप्ते। अनाचिता रा॰म॰
दीनां किं। आचितं। पर्याचितं। आस्थापितं। परिगृहीतं। निरुक्तं। प्रतिपन्नं। उपस्थितं। उपश्लिष्टं। संहितं। आचित। संहि ६३

हिता शब्दोपदाऽगोः रन्यस्य संज्ञा न तदा। चिता दिः गोः संज्ञा न तदा तो दान्तः। प्रवृद्धादीनां च। प्रवृद्धादीनां तं तऽदान्तः स्या
त। प्रवृद्धं यानं। दुधाऽजश्व हितः। खट्वारूढः। अभिसंज्ञा प्रीयमाणं भः। आकृतिगणो ऽयं। पुनरूस्यूतं। पुनर्निष्कृतः। अ
त्राऽपि स्थिति पुनः। छान्दसः छंदसि गानि संज्ञः। ब्रह्मचारी चरति। कारका द्दत्तश्रुतयोरेवाऽशिषि। तत्पुरुषे संज्ञायां आ
शिषि कारकात्परयोर्दत्तश्रुतयोरेव क्तांतयोरंतऽदान्तः स्यात्। संज्ञायाम् नाचितादीनां मित्यस्य नियमोऽयं। देवा
शानं देयात् देवदत्तः। विरनं श्रूयात्। विष्णुश्रुतः। कारका त्किं। अकारकान्नियमो मा भूत्। शं भं तस्मा यशो। दान्तश्रु
तयोः किं। देवपालितः। अत्रास्मान्नियमो ऽज्ञाया भावे ना चितादीनामित्येतदभावेऽतृतीया कर्मणीति भवति। एवे
ति किं। दत्तश्रुतयोः कारकाद् देवेति मा भूत्। संस्कृतो विश्रुत इत्यत्र भवत्येवांतोदात्तत्वं। इह च प्रसज्येत देवपालि
त इति। आशिषि किं। अनाशिषि नियमो मा भूत्। देवैः खाता देवखाता। कारकाद्दत्तश्रुतयोराशिष्येवेत्ययमप्यत्र
नियम इष्यते। कश्चिच्छात्र विशेषो देवदत्तः। अनाहतो नदति। अत्र तृतीया कर्मणीत्येव भवति। अत्रैकारकादिति यो
गं विभज्य दूरादागत इत्यत्रांतोदात्तत्वं विधेयं गतिरनन्तर इति बाधनार्थं इत्युक्तो। इच्छाम ते स्तुतमिति च। इत्थं
